The *Agni purāṇa* has incorporated the principles of Vedānta doctrine, so much so that the Upanisadic *Mahāvākya* -s such as 'The self is Brahman (*ayam ātmā Brahma*), you are that (*tat tvam asi)* are quoted in it.[18]. The description of the state prior to the creation of the universe in the *Kūrma Purāṇa* expresses the philosophical thought in the *Nāsadīya sūkta* of the *Ṛgveda* (Rv.X, 129)[19] The creation account of the *Bhaviṣya Purāṇa* shows the impact of the *māyāvāda* of Śankarācarya when it states that cause- which is micro is only one but it appears to be

15. *Brahmāṇḍa Purāṇa* I.3.10-24
16. *Sāṁkhyapravacanasūtra* I.61
सत्त्वरजस्तमसां साम्यावस्थितिः प्रकृतेर्महान् महतोऽहंकारोऽहंकरात् पञ्च तन्मात्राणि......
17. *Brahmāṇḍa Purāṇa* III. 4.2.ff III. 4.2. ff
18. *Agni Purāṇa* 377. 1cd
अयमात्मा परं ब्रह्म अहमस्मीत्युच्यते ॥
Also *Agni Purāṇa* 377.23 ab
अयमात्मा परं ब्रह्म तद्ब्रह्म त्वमसीति च ।
19. *Ibid* 377. 16 ab
न सन्नासन्नसदसदेतत्सावयवं न तत् ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

many.[20] Following the same principles, the Brahmavaivarta Purāṇa states that the twofold mundance existence is unreal like to bubble of water or dream and it is the cause of infatuation.[21]

Ardhanārīnaṭeśvarasiddhānta

Accoirding to the *Brahmavaivarta Purāṇa,* Śrikṛṣṇa is the creator (viz. micro cause). Rādhā of constituting the left half is said to have been born of him and Rādhā and Kṛṣṇa are like Prakṛti and Puruṣa who unitedly create the universe.[22] From woredly point of view, macro-micro relationship is explained on the basis of the universal phenomenon of the mating of male with female (*maithunī sṛṣṭi*) bringing about creation and from spiritual point of view, Rādhā is Kṛṣṇa's power and the mere utterance of the word Rādhā is said to be enabling the aspirants to achieve salvation.

The author of the *Bhāgavata Purāṇa* has synthesized the Vedānta and Sāṅkhya systems with that of the Yoga. According to him, Nārāyaṇa is the first highest Puruṣa (i.e. the micro cause) who is beginningless, endless, changeless and perfect.[23] Although Nārāyaṇa is the name of the first personified being, he is described as attributeless (*nirguṇa*). The (macro) world is said to have rested on the glorious Nārāyaṇa, i.e. the micro cause[24] and the eightfold path of *yoga* (*aṣṭānga-yoga*) is considered to be the means which enables the aspirant to reach (micro) cause and achieve salvation. In full agreement with the exposition of Patāñjali, fixed attention (*dhāraṇā*), withdrawal of senses (*pratyāhāra*), steadiness of mind, meditaion are considered to be the means with which the aspirant can unite with the micro cause.[25] The accounts of creation and dissolution stated above are representative in nature. Similar accounts are found in the other *purāñas.*

Concepts of Personification and Trinity of Gods

The knowledge of the absolute reality viz. the micro cause was considered to be the means to an end and the end was to have the

20. *Bhaviṣya Purāṇa* I.2.8
21. *Brahmavaivarta Purāṇa* IV. 78. 17
    जलबुद्बुदवत्सर्वं संसारं सचराचरम् ।
    प्रभाते स्वप्नवन्मिथ्या मोहकारणमेव च ॥
22. *Ibid* II. 67. 73
23. *Bhāgavata Purāṇa* II. 6. 38-39
24. *Ibid* II. 6.30 ab
    नारायणे भगवति तदिदं विश्वमाहितम् ।
25. *Ibid* III 28. 31-36

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

knowledge of it, to reach it and to achieve the Highest Bliss of Final Beatitude. Knowing very well that human mind has its own limitations, and it is always bound by forms and having realised that painful indeed is the effort of those who concentrate their attention on the abstract, unmanifest micro cause,[26] the composers of the *Purāṇa*-s advocated adoration of concrete, personified deities as a simple means to reach them which will finally enable the aspirants to reach the micro absolute cause.[27] Similarly, having realised that imperceptible abstract micro cause is beyound the reach of the masses, and having known that the act of creation necessarily involves the acts of preservation and dissolution, the composers of the *purāṇa* -s developed the concept of the trinity of Gods, viz. Brahmā. Viṣṇu and Śiva. Brahmā was the creator, Viṣṇu was the preserver and Rudra Śiva or Śiva was the dissolver.[28] Mere difference in name (*sanjnābheda*) is responsible for the difference in forms. These three were related with the three *guṇa*-s of the Sāṁkhya system. The universal spirit dominated by *rajuguṇa* was Brahmā, when dominated by *sattvaguṇa,* he is Viṣṇu and when dominated by *tamoguṇa,* he is Śiva.[29] According to the true theory, however, in fact they are the same.[30]

The concept of Liṅga in the Purāṇa-s

The concept of *liṅga* is another distinct feature of the Purāṇic religio-philosophical doctrine. *Linga* means sign and it symbolically represents Śiva who is the supreme Reality devoid of any form, colour amd smell[31] and who pervades the entire cosmos.[32] *Linga* is *linga* worth the name because the whole universe gets dissolved in it.[33] Śiva through his *linga*

---

26. *Bhagavadgītā* XII.5
क्लेशोऽधिकतरस्तेषावामव्यक्तासक्तचेतसाम् ।
27. *Brahmavaivarta Purāṇa* I.3. 3-5
Also, *Garuda Purāṇa* 22. 1 ab
शिवार्चनं मुक्ति ······कारकम् ।
28. *Skanda Purāṇa* I.1.7.6. also *Kūrma Purāṇa* I.26.99
29. *Garuḍa Purāṇa* III.4.4. cd 5-6,8
30. *Padma Purāṇa* VI. 82. 30 also *Garuḍa Purāṇa* III. 4.9
31. *Linga* Purāvṇa I. 3. 2. cd, 3ab
गन्धवर्ण रसैर्हीनं शब्दस्पर्शादिवर्जितम् ।
अगुणं ध्रुवमक्षय्यमलिङ्ग शिवलक्षणम् ॥
32. *Skanda Purāṇa* I. 1. 7. 4. ab
त्वया लिङ्गस्वरूपेण व्याप्तमेतज्जगत्त्रयम् ।
33. *Ibid* I. 1. 6. 29 cd, 30 ab
यस्माल्लीनं जगत्सर्वं तस्मिंल्लिगे महात्मनः ॥
लयनात् लिङ्गमित्येवं प्रवदन्ति मनीषिणः ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

form was believed to be sustaining the world.[34] *Linga* being the symbol of Śiva, the worship of *linga* was the same as the worship of Śiva , which, it was believed, enabled the aspirants to achieve salvation.[35] According to Bhandarkar R.G., the element of *liṅga* worship might have crept in early enough among ordinary people who were in close contact with uncivilized tribes and gradually it was spread among higher classes as well.[36] Although Bhandarkar's inference could just be a surmise, and nothing can be definitely stated regarding the origin of *liṅga* worship, it is certain that *liṅga* worship was in vogue before the Puranic age. It was found to be adoptable as a simpler and easier way of worshipping the divinity and the *purāṇa*-s incorporated it in their works in order to appeal to and attract the masses. *Liṅga* was a micro symbol of micro divinity Ṣiva that was responsible for the phenomenon of creation-dissolution of the world.

Idol Worship

A history of mankind throws light on the fact that man was aware of the importance of natural powers. He started adoring them through symbols such as stones, trees, rivers etc. The concept of symbolic deification later on culminated into the personification of these deities in human form and worshipping them in the form of idols. Like *liṅga* , an idol too, a stone-idol, clay-idol, wood-idol or gold-idol[37] is a micro symbol of a micro divinity representing the macro world. Knowing the importance of the practice of idol worship as a simple means of approaching the micro cause the *purāṇa*-s continued the same tradition of worshipping it.

Conclusion

Winternitz held that the *purāṇa*-s were the sacred books of the second grade and the narrations of bards meant only for women and śūdra-s.[38] If so, it is necessary to investigate the facts which induced the composers of the *purāṇa*-s to incorporate the accounts dealing with macro-micro cosmic

---

34. *Ibid* I. 3. 6. 52 ab
35. *Padma Purāṇa* V. 109 72
36. Bhandarkar R.G, *Vaiṣṇavism, Śaivism and Minor Religious Systems* , Oxford University Press, Bombay, 1913, pp. 114-115
37. *Matsya Purāṇa* 266.68 ab, 267.1 also, *Brahma Purāṇa* 47.41ff, *Agni Purāṇa* 38.34.
38. Winternitz M. "Purāṇas and their position in Indian Literature", *History of Indian Literature,* Vol. I, Delhi pp. 577-578.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

relationship which being philosophical and metaphysical in nature are primarily meant for the elite, the intelligentsia and not the masses.

Philosophy aims at finding out metaphysical truth which forms the source of religion. The sphere of philosophy is that of abstract metaphysical ideas which in their turn culminate into actual practices and form the sphere of religion. Philosophy, thus, forms an integral part of religion. It is vitally associated with religion. From historical point of view, the study of religion indicates that like any other social phenomenon it has its roots in the past and it shapes the future. When the phenomenon of religion is studied from sociological point of view, one knows that it can be studied in the light of the concept of social change. It is a ptoduct of changing social circumstances. When society is stable, it need not undergo any change. But in the period of rapid transition, the existing ideas do not serve its needs.[39]

Change is inevitable. The purāṇic contents throwing light on macro-micro cosmic relationship forming part of the purāṇic religion shows these trends. On the one hand, it is seen to be continuing the earlier monistic traits of the Upaniṣadic period and on the other hand, by assimilating the views of various systems of philosophy that were popular in those days and by synthesizing them all with the doctine of absolute monism and the concept of personification, they gave a new turn to the old principles in order to attract the masses. The composers of the *purāṇa*-s tried to wean away large sections of society from the new offshoots of Hinduism, i.e. Jainism and Buddhism.

In conclusion it can be said that the change in the nature of macro-micro cosmic relationship was the need of the time and the same was very ably met with by the composers of the *purāṇa*-s.

●

39. More details Shah A.B. Somaiyya Publication, Bombay, 1981, p. 14 ff.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वासिष्ठलिङ्गपुराणस्य विषयक्रमः

डा. गङ्गासागररायः

[The Vāsiṣṭha Linga Upapurāṇa is an unpublished Purāṇa and included in the most of the lists of the Upapurāṇas. It's other names are Māheśvara or Māheśa and Vāsiṣṭha Laiṅga Purāṇa. This Purāṇa is critically edited and is ready for publication. Some chapters of it are printed in this issue of 'Purāṇa' Bulletin. For the benefit of readers its contents are being given here.]

[अद्यावधि अप्रकाशितस्य वासिष्ठलिङ्गोपपुराणस्य विषयानुक्रमः अत्र प्रदीयते । अस्योपपुराणस्य माहेश्वरपुराणम् माहेशपुराणम्, वासिष्ठलैङ्गपुराणं च अपराणि नामानि प्राप्यन्ते । शैवमतप्रधानस्यास्योपपुराणस्य पाठसमीक्षितं संस्करणं प्रकाशनार्थं सज्जं वर्तते । केचन अध्याया:'पुराणम्' पत्रिकाया अस्मिन्नेवाङ्के मुद्रिताः सन्ति ।]

प्रथमोध्यायः (श्लोकाः ३६)

वसिष्ठस्य कैलासोपरि शङ्करदर्शनार्थं तपश्चरणम् । वायुभक्षपरेण पञ्चाग्निसेवनपरेण वसिष्ठेन दिव्यं वर्षसहस्रं पञ्चाक्षरमन्त्रस्य जपः (१-३) वसिष्ठस्य तपश्चर्यया प्रीतो भगवान् शिवः प्रथमं ज्योतिर्लिङ्गेन पुनश्च दक्षिणामूर्तिरूपेण प्रादुर्बभूव । शिवस्य विशदं रूपवर्णनम् (४-१४); प्रणतं वसिष्ठं प्रति तपश्चरणकारणस्य जिज्ञासा अभीष्टान् वरान् प्रदातुं घोषणा च (१५-१८); वसिष्ठस्य शिवं प्रति प्रश्नाः–(१) जगतः किं कारणम्, (२) जगतः कोऽधिष्ठाता, (३) कः संबंधः, (४) सर्वं जगत् कथं चेतनाचेतनात्मकं (५) किं परतरं तत्त्वं (६) परतरस्य तत्त्वस्य किं लक्षणं का वा मूर्तिः (७) का मुक्तिः (८) कस्य मुक्तिः (९) बन्धः कः (१०) मोक्षस्य किं लक्षणम् (११) देवस्य कानि प्रियाणि स्थानानि (१२) कीदृशो धर्मो भवेत् (१३) कीदृशः धर्म उच्यते (१३) किं प्रमाणं (१४) कथं महेश्वरः पूज्यः (१५) अस्य कः पूजाविशेषः (१६) कः फलभेदः (१७) किं भस्म उक्तम् (१८) केन भस्म इति कीर्तितम् (१९) तत् कतिविधं प्रोक्तं (२०) केषां धार्यम् (२१) केन मन्त्रेण तत् धार्यम् (२२) कीदृशं धारणं प्रोक्तम् (२३) धारणा कीदृशी मता (२४) धारणस्य किं फलम् (२५) कुत्र रुद्राक्षधारणं प्रोक्तं (२६) केन मन्त्रेण कया भावनया च, केषां धार्यम्, धारणस्य किं फलम् (२७) ब्राह्मणैर्नित्यं किं जप्यम् केन प्रकरेण जपः, पुरश्चर्या कीदृशी, जपस्य किं फलम् प्राप्यते (२८) वर्णाश्रमाचारः कथं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रोक्तः (२९) युगधर्माः कथं प्रोक्ताः (३०) भगवान् नीललोहितः कथं दारुवनं प्राप्तः–तत्र मुनिभिः किं कृतं; देवदेवेन किं कृतम् (३१) किमर्थं शंकरः दारुवनं गतो मुनिभ्यः किमुक्तम् (३२) ब्रह्मा कथं ऋभुं पुत्रं जनयामासं (३३) ऋभुः निदाघाय कथं ब्रह्म उपदिष्टवान् (३३) दुष्कृतकर्मकर्ता शूद्रः कथं ब्रह्मपदं प्राप्तवान् (१९-३६)

द्वितीयोऽध्यायः (श्लोकाः २६)

सृष्टिवर्णनम्; प्रसङ्गात् नारायणशब्दनिर्वचनम्

तृतीयोऽध्यायः (श्लोकाः १२०)

शिवतत्त्वस्य लक्षणम् (१-२), शिवमूर्तिवर्णनम् (२-३), भोगमोक्षप्रदा शिवमूर्तिः ब्रह्माद्यैः सर्वदा उपास्या (४-५), अज्ञाननाशात् मुक्तिप्राप्तिः (६-७) मुक्तिप्रदानां तीर्थानां वर्णनं प्रशंसनं च–कैलासाचलप्रशंसनम् (८-९), वाराणसीप्रशंसनं (१०), व्याघ्रपुरप्रशंसा (११-१३), वाल्मीकमाश्चर्यप्रशंसा (१४-१६ab), काञ्चीपुरप्रशंसा (१६cd-१८), श्रीपवर्तप्रशंसा (१९-२०), ब्रह्मपुरप्रशंसा (२१-२१), श्वेतारण्यप्रशंसा (२४-२८), मध्यार्जुनतीर्थप्रशंसा (२९-३२), कुम्भकोणतीर्थप्रशंसा (३४-३८); जप्येश्वर- माहात्म्यम्-प्रसङ्गात् शिलादतपश्चरणवर्णनं अत्र सप्तमातृणां सिद्धिः धर्मस्य तपश्चरणं वृषत्वप्राप्तिंश्च, सेतुवन्धतीर्थप्रशंसनम् (३९-४१)-अत्र रामेश्वरलक्ष्णेश्वर – सुग्रीवेश्वर – अङ्गदेश्वर–हनुमदीश्वर-लिङ्गानां वर्णनम्; सोमेश्वर तीर्थवर्णनम् (सोमनाथतीर्थप्रशंसनम्) (६२–६३); केदारेश्वरप्रशंसनम् (६३–६५); भीमेश्वरवर्णनम् (६५–६६); वृद्धाचलेश्वरमाहात्म्यम् (६९–६८); गोपर्वतमाहात्म्यं (७९–८४); कालहस्तितीर्थवर्णनम् (८५–१०३)

चतुर्थोऽध्यायः (श्लोकाः १-७१)

लिङ्गपूजनविधिः फलं च .– विविधतिथिषु लिङ्गपूजनविधिः फलं च (३–२४); विविधनक्षत्रेषु लिङ्गपूजनविधिः फलं च (२५–५२); विविधदिनेषु लिङ्गपूजनविधिः फलं च (५३–६९); व्यतीपाते लिङ्गपूजनं फलं च (६८–६९); शिवपूजनस्य माहात्म्यम् (७०–७१)

पञ्चमोऽध्यायः (श्लोकाः १-४५)

भस्मवर्णनम्– भस्मशब्दनिर्वचनम् (२); क्षारशब्दनिर्वचनम् (३), भस्मप्रकारवर्णनम् (४–६); किं प्रकारकं भस्म केन धार्यम् (७–१०) भस्मधारणविधिः (१०–२०); भस्मधारणफलं (२१–२४); भस्मधारणद्वेषिनां निन्दा (२५–३१); भस्मधारिणं दृष्ट्वा ये प्रीता भवन्ति तेषाम् अभ्युदयो भावी (३२–३३); भस्मधारणंमाहात्म्यम् (३४–४५)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

षष्ठोऽध्यायः (श्लोकाः १-२८)

रुद्राक्षधारणम्– रुद्राक्षधारणविधिर्माहात्म्यं च (१–९); रुद्राक्षधारिणां द्वेषिणां निन्दनं (१०–११); रुद्राक्षधारणमाहात्म्यं रुद्राक्षधारिणो दानपूजादिमहत्त्वम् (१२–२०); गोहत्याब्रह्महत्यादिनानापापकारिणश्चाण्डालस्य रुद्राक्षधारणात् पापनिवृत्ती रुद्रलोकप्राप्तिश्च (२०–२८)

सप्तमोऽध्यायः (श्लोकाः १–७०)

प्रणवजपविधिः– प्रणवस्य छन्दोदेवताऋष्यादिकथनम् अङ्गन्यासाधिविधिश्च (१–१६); अकार–उकार–मकराणां ऋषिछन्दोदेवता-विनियोग-कथनम् (१७–२७); ओङ्कारमाहात्म्यम् (२८–३५); ओंकारजपविधिः फलं च (३६–४०); विविधद्रव्याणां होमेन विविधकामानामवाप्तिः (४१–४६); विविधपापानां शोधार्थं पृथक् पृथक् संख्या जपविधिः (४७–६१); प्रणवमाहात्म्यम् (६२–७०)

अष्टमोऽध्यायः (श्लोकाः १–६८)

वर्णधर्माः (१-५); आश्रमधर्माः (६-१३); वर्णाश्रमधर्मपालनफलम् (१५-१८); वेदमार्गत्यागिनः विष्णुपूजकस्य शाण्डिल्यस्य चरितम् (१९-२९); वेदमार्गत्यागिनः शाण्डिल्यस्य यमपुरे घोरयातना तदनन्तरं विष्णुपुरे गमनं विष्णुनादिष्टः सदाचारपालनाय पुनर्मृत्युलोकामागतः (३०-४८); मृत्युलोके वेदमार्गप्रदिष्टवर्णाश्रमाचारपालनात् वैराग्येण तस्य मुक्तिः (४९-५६); वेदमार्गप्रदिष्टधर्मस्य पालननिर्देशः (५९-६२).

नवमोऽध्यायः (श्लोकाः १-८४)

युगधर्माः (१-१२); कलिधर्माः (१३-५४); वेदव्यासेन वेदान्तसूत्राणां रचना जैमिनिना च कर्मकाण्डसूत्रस्य रचना उभाभ्यां लोकस्य वेदमार्गे सुस्थितिः (५५-५९); ज्ञानात् कर्मणां नाशः ज्ञानिनः प्रशंसा च (६०-७३); काश्यां मणिकर्णिकास्नानान्तरं विश्वेश्वर-दर्शनात् कलिदोषमुक्तिः (७४-७५); सुवर्णमुखरीनद्यां स्नात्वा कालहस्तिनाथस्य दर्शनात् कलिदोषनिवृत्तिः अस्मिन् तीर्थे स्नानदानादिप्रशंसा च (७६-८४).

दशमोऽध्यायः (श्लोकाः १-८४)

देवदारुवनवृत्तान्तं–सर्वसाधनसंपन्ने दारुवने भृग्वादिचतुश्चत्त्वारिसंख्याकानामष्टसहस्रसंख्याकानां च ऋषीणां तपश्चरणम् (१-८); ऋषिभ्यो ज्ञानप्रदानार्थं दिगम्बरवेषधारिणो शिवस्य स्त्रीवेषधारिणा विष्णुना सह आश्रमप्रवेशः तस्व भिक्षाटनं च (९-११), सुरूपवेषधारिणं दिगम्बरं शिवं दृष्ट्वा ऋषिपत्नीनां शिवं प्रति कामासक्तिः स्त्रीवेषधारिणं विष्णुं च दृष्ट्वा ऋषिपुत्राणां कामासक्तिः (१२-१६); दारुवने नारीणां नराणां घोर

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संक्षोभं दृष्ट्वा ऋषीणां शिवं प्रति शापोऽभिचारश्च (१७-१९); शापादिकं विफलं दृष्ट्वा ऋषीणां शिवं प्रति दारुवनागमनकारणजिज्ञासा (२०-२१); दारुवने तपश्चर्तुमिति शिवस्योक्तिः (२२-२३); ऋषिभिः शिवभार्यायाः विनिन्दिनं तां त्यक्त्या दिगम्बरत्वं च त्यक्त्वा तत्र निवासाय कथनं (२४); शिवभार्या अदुष्टा इति शिवस्योक्तिः (२५); शिवभार्या दुष्टेति ऋषीणां पुनरुक्तिः आश्रमत्यागाय च कथनं (२५-२६); शिवेन स्वधर्माधर्मादिरहित्वकथनं तच्छ्रुत्वा ऋषिभिः लोष्टमुष्टिदण्डैः शिवस्य ताडनं (२९-३५); ऋषिभिस्ताडितस्य शिवस्य दारुवने भिक्षाटनं, वसिष्टपत्न्याऽरुन्धत्या तस्य पूजा व्रणसन्धानपूर्वकं सुश्रूषा (३६-३९); शिवेन तां प्रति स्वस्वरूपकथनं (४०-४९); भिक्षाटनं कुर्वन्तं शिवं दृष्ट्वा लिङ्गसमुत्पाटनाय कथनं शिवेन लिङ्गसमुत्पाटनं तदनन्तरं भार्यया सह अन्तर्हितत्वं (४८-५०); ऋषिभिः शिवस्य तद्भार्यायाः लिङ्गस्य च अदर्शनम् (५०-५१); दारुवने संक्षोभोत्पाताश्च (५१-५२); ऋषिभिः ब्रह्मलोकं गत्वा सर्ववृत्तान्तकथनं (५३-६०); साक्षात् महेश्वर एव स्त्रीरूप-धारिणा विष्णुना सह दारुवनं गतः इति ब्रह्मणोक्तिः; तस्योपेक्षया ताडनादिभिश्च ऋषिभिर्महान् प्रमादः कृतः, सर्वजगतः मूलकारणस्य शिवस्योपेक्षया ऋषिभिः महान् अपराधः कृतः (६१-७६); भूमिपतितं लिङ्गं यथा दृष्टं तत्सदृशस्य लिङ्गस्य पञ्चाक्षरेण पूजनस्य ब्रह्मणोक्तिः (७५-८०); श्रीकालहस्तिशैलाख्ये स्थाने माघे मासे मघर्क्षे सुवर्णमुखरीनद्यां स्नात्वा शिवं पूज्य दानं च दत्त्वा स्वस्थाने गत्वा शिवपूजनस्य ऋषीन् प्रति व्रह्मण आदेशः (८१-९०); ऋषिभिः कालहस्तिशैलं गत्वा सुवर्णमुखरीनद्यां स्नात्वां शिवं संपूज्य दानं दत्त्वा स्वाश्रमागमनं (९१-९६); दारुवनमागत्य ऋषिभिः सपुत्रदारैः शिवलिङ्गस्य पञ्चाक्षरेण मन्त्रेण पूजनं (९७-९८); तेषां रक्षार्थम् उमया सह नग्नरूपेण शिवस्य प्रादुर्भावः ऋषिभिः पूजनं क्षमायाचनं च (९९-१०३); ऋषीन् प्रति स्वस्वरूपकथनं आत्मज्ञानप्रदानं च (१०४-१३९); लिङ्गार्चनमहिमा (१४०-१४१) वैदिकज्ञानप्रवर्तनाय ऋषिभ्य उपदेशः (१४२-१५२); श्रीकालहस्तिशैलाख्यतीर्थस्य प्रशंसनम् तत्र स्नान-दानादि माहात्म्यं एतत्तीर्थद्वेषिणां विनिन्दनं च (१५३-१७३); अध्यायफलश्रुतिः (१७४-१७५)

एकादशोऽध्यायः (श्लोकाः १०७)

जगत्सृष्ट्वा कामार्तः ब्रह्मा स्वभार्यया रेमे तस्य अयुतत्रयपुत्रोत्पत्तिः (१-२); ब्रह्मणः पुत्रैः राक्षसोत्पत्तिः, राक्षसैर्जगदव्याप्तं (३); तैर्जगत्पीडनं (३); देवा मुनयश्च ब्रह्माणं शरणं गताः (४); देवैर्मुनिभिश्च ब्रह्मणः स्तुतिः (५-९); राक्षसभयाद् रक्षणाय प्रार्थना (१०-११); ब्रह्मणा तेभ्योऽभयदानं राक्षसविनाशकरपुत्रोत्पादनं तेन राक्षसविनाशः जगत्स्वास्थ्यं च (१०-१६); ब्रह्मणां मोहं विनिन्द्य कालहस्तिशैलाख्यं स्थानं गत्वा तपश्चरणं शिवपूजनं च (१७-२४); प्रीतं सोमं शिवं प्रति ज्ञानयुक्तधार्मिकपुत्रप्राप्तये प्रार्थना (२५-२७); शिवेन ब्रह्मणे ऋभुसंज्ञकज्ञानिपुत्रप्रदानं (२८-२९); पुनः ब्रह्मणा शिवं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रति प्रार्थना यद् यः मनुष्यः माघमासे मघर्क्षे सुवर्णमुखरीनद्यां स्नात्वा कालहस्तिनाथशैलाख्यं शिवमुद्दिश्य विदुषे ब्राह्मणाय दानं दत्त्वा अष्टोत्ररशतं प्रदक्षिणं च कृत्वा 'मम पुत्रं देहि' इति प्रार्थयते तस्य पुत्रं देहि (३०-३३); ब्रह्मणे वरप्रदानं तीर्थमाहात्म्यं च (३४-४२); ऋभुणा शिष्याय अगस्त्यपुत्राय निदाघाय ब्रह्मज्ञानप्रदानं (४३-७५); निदाघेन ज्ञानविस्मृतिः कर्मवासनाप्रवृत्तिश्च (७६); वर्षसहस्रान्ते ऋभुः निदाघसमीपागतः तस्य निदाघेन सत्कारः पुनश्च निदाघाय ऋभुणा ब्रह्मज्ञानोपदेशः (७७-१०१); निदाघस्य पुनः कर्मप्रवृत्तिः दैववर्षसहस्रान्ते पुनः ऋभोरागमनं ब्रह्मज्ञानोपदेशश्च (१०२-१०४); निदाघस्य ज्ञानोपलब्धिः प्रारब्धकर्मक्षयान्ते मोक्षलाभश्च ((१०५-१०६).

द्वादशोऽध्यायः (श्लोकाः ५६)

काश्मीरदेशीदशूद्रवृत्तान्तः–सर्वभूताहिते रतः कश्चित् काश्मीरदेशीयः शूद्रः शिवयोगिने भिक्षामदात् भार्यया सह शुश्रूषां च चकार (१-४) प्रसन्नेन शिवयोगिना शूद्राय काल-हस्तिनाथशैलाख्यस्थानं गन्तुमुपदेशः (६-७); सभार्य शूद्रः कालहस्तिशैलेशं गत्वां माघमासे मघर्क्षे सुवर्णमुखरीनद्यां स्नात्वा नित्यमष्टोत्तरशतं प्रदक्षिणं कृत्वा त्रिवर्षं यावत् इदं व्रतं कृत्वा मठं च स्थापयित्वा शिवयोगिने धनधान्यं प्रदाय त्रिवर्षान्ते सुवर्णमुखरीस्नानं कृत्वा श्रीकालहस्तिनाथाय धनादिकं दत्त्वा व्रतं समाप्य यथाकालं मरणं प्राप्य इन्द्रपदं प्राप्तः (८-१५); पुनः भार्यया सार्धं सुवर्णमुखरीनद्यां स्नात्वा देवेशं पूजयामास (१६-१७); बृहस्पतिना प्रणवेन सह अङ्गन्यायादिसहितस्य पञ्चाक्षरमन्त्रस्य तस्मै उपदेशः (१८-२३); बृहस्पतिना मन्त्रमाहात्म्यवर्णनम् (२४-३१); तत्र लक्षमन्त्रं जप्त्वा ऐश्वर्यं त्यक्त्वा व्रह्माणंम् गतः, ब्रह्मणा तस्मै स्ववपुःप्रदर्शनं तस्य कैवल्यलाभश्च (३२-३६); श्रीकालहस्तिशैलक्षेत्रमाहात्म्यम् (३७-४३); पुराणश्रवणपात्रगुणवर्णनम् (४४-४७); पुराण-फलश्रुतिः (४८-५६)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Obituary

HER HIGHNESS MAHARANI JAYANTI DEVI

Her Highness Maharani Jayanti Devi passed away at the Nadesar Palace on 20.4.1996-the auspicious day of *Akṣaya Tritīyā*. Members of the immediate family were at her bedside when she breathed her last. The Maharani had entered the precincts of Kāsī on the *Akṣaya Tritīyā* day in 1948 after her marriage to the Kashi Naresh H.H. Dr. Vibhuti Narain Singh Ji. It is a strange and rare coincidence that her mortal self left Kāśī on the same *Tithi* forty eight years later. The last rites were performed by the Yuvaraja Sri Anant Narain Singh the same day on the holy *Maṇikarṇikā* Ghat after the official-dom of Varanasi and its dishnguished citizens had offered their obeisance.

The funeral procession from the Nadesar Palace was led by the jawans of the 39th Battalion of Gorkha Rifles, P. A. C. and city Police with the military band in attendance. A large number of dignitaries, heads of academic institutions, learned men and ordinary citizens of Varanasi participated in the procession.

The Śrāddha rites were performed by Yuvraj Shri Anant Narain Singh Ji in the presence of H. H. Maharaj Kashi Naresh Dr. Vibhuti Narain Singh. The hallowed Śāstric traditions were followed in the minutest details and in their full glory.

Condolences poured in from all sides. The citizens of Varanasi, the Vice–Chancellors of all the three Universities, the Governor of Uttat pradesh Shri Moti Lal Bora and a host of dignitaries from far and near made personal visit to the Ramnagar Fort to pay their respects and participate in the rituals.

Maharani Sahiba was a traditionalist to the core and an ideal house-wife who follwoed the customary, Pūja, vrata and other rituals followed in her house hold.

She traveled to all the four *'dhāms'* and special 'tīrthas' sanctified by our traditions. Kindness towards others was a special characteristic of her nature.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

She served as guiding light for the All India Kashiraj Trust and other institutions of the Banaras House and all of them will miss her greatly. She has been liberated in accordance to tradition of Śāstras 'Kāśyāṁ Maraṇān Muktih'.

We pay our homage to the great departed soul.

–Ganga Sagar Rai

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ACTIVITIES OF THE ALL INDIA KASHIRAJ TRUST

(January-June 1996)

GARUḌA PURĀṆA WORK

During the the Period some more chapters of critical apparatus were revised. The printing of the critical edition has also started. The work on appendices is continuing.

WORK ON UNPUBLISHED PURĀṆAS

The work on unpublished manuscripts of the following Purāṇas was taken up.

1. Vāsiṣṭha Linga Purāṇa 2.Varuṇa Purāṇa.3.Vindhya Māhātmya and 4.Mānaskhaṇḍa of the Skanda Purāṇa.

The work of critically editing the Vāsiṣṭha Liṅga Purāṇa is in final phase. Some chapters of the text are published in this issue. work on the other manuscripts is also in progress.

VISITORS TO THE PURĀṆA DEPARTMENT

1. Dr. Mandan Mishra, Vice Chancellor, Sampurnanand Sanskrit University visited on 6-1-96.

2. Dr. Jugal Kishore Mishra, Pro Vice Chancellor, Sampurnanand Sanskrit University visited on 6-1-1996.

3. Keonraad Elst, Belgium visited on 13-2-1996 He remarked; Impressive. Finally, I discovered the place where the wrongfully neglected Purāṇic tradition is given its due. The Journal Purāṇa is hardly ever quoted or read by Western Indologists, but if I can help it, that will change.

4. Juvan R. Yuste-Madrid, Spain.

5. Sri B. P. Singh, Secretary Culture Department. Ministry of Human Resources Development, New Delhi-13-4-1996.

6. Dr. Lee A Siegel-Professor of Indian Religion, University of Hawai. He writes : with my admiration for the great work of the Trust-25-6-1996.

ACTIVITIES OF THE SISTER TRUSTS

1. Maharaja Benares Vidya Mandir Trusts.

DHRUPAD MELA 1996

The 1996 Dhrupad Mela at Dhrupad Teerth, Tulsi Ghat, Varanasi was the 22nd consecutive annual,. This was held from Feb 15 to Feb 17 by Maharaja Banaras Vidya Mandir Trust. The Mela was inaugurated by

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Yuvaraja Sri Anant Narain Singh on the opening day. He emphasized the importance of Dhrupad and expressd his satisfaction on the impact of this Mela. He thanked Professor Veerbhadra Misra for his services in organising and conducting the Mela. Several eminent personalities and Dhrupad performers of eminence were present in the audience. Around 70 Dhrupad musicians took part in the Mela.

Some of the artists were Pt. Siya Ram Tiwari, shri Sukdev pawar, Ud Sayeeduddin Dagar, Utsava Shinde, Swami Pagal Das, Prem Kumar Mallik, Prof. Raj Bhan Singh, Dr Ritwik Sanyal etc.

2. Maharaja Udit Narain Singh Mānasa Prachār Nidhi.

Under the auspices of this Trust Navāha Pārāyaṇa (a nine-day Pārāyaṇa) and Pravacana of Rāmacaritamānasa was organised in the Kali Temple of Chakia. The Pārāyaṇa and Pravacana were performed from Vaiśākha Śukla Dvitīyā to Vaiśakha Śukla Daśamī of 2053 Vikrama era (18 April-29 April 1996).

Famous Vyasas gave discourses on Rāmāyaṇa. A Large number of public listened to the Pravacana. The Pravacanas were also attended by His Highness Maharaja Dr. Vibhuti Narain Singh. On conclusion a Bhaṇḍārā was organised.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सर्वभारतीय काशिराजन्यासस्य कार्यविवरणम्

(जनवरी-जून १९९६)

गरुडपुराणकार्यम्

अस्मिन् कार्यावधौ पाठसमीक्षोपकरणस्य केषाञ्चिदग्रिमाध्यायानां संशोधनं संवृत्तम् । गरुडपुराणस्य आचारखण्डस्य पाठसमीक्षितसंस्करणस्य मुद्रणंमपि प्रचलति । परिशिष्ट-निर्माणंमपि प्रचलति ।

अप्रकाशितपुराणानां पाठसंपादनकार्यम्

अधोनिर्दिष्टानामप्रकाशित पुराणानां संपादनकार्यं प्रारब्धं वर्तते–

१. वासिष्ठलिङ्गपुराणम्, वरुणपुराणम्, विन्ध्यमाहात्म्यम्, तथा च स्कन्दपुराणान्तर्गतं मानसखण्डम् ।

वासिष्ठलिङ्गपुराणस्य संपादनकार्यं पूर्णतां कोटिं जातम् । अस्योपपुराणस्य विषय विवेचनं के षाञ्चिदध्यायानां मुद्रणमपि पुराणपत्रिकाया अस्मिन्नेवाङ्के वर्तते । अन्येषां पुराणानां संपादनमपि प्रचरति ।

पुराणविभागे आगता विद्वांसः

अस्मिन्नवधौ अधोनिर्दिष्टा विशिष्टा विद्वासः पुराणविभागे समागताः ।

१. डा. मण्डनमिश्रः–संपूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिः ६.१.९६ दिनाङ्के

२. डा. युगलकिशोरमिश्रः–संपूर्णानन्दसंस्कृतविश्वविद्यालयस्योपकुलपतिः ६.१.९६ दिनाङ्के

३. श्री केयोनराड एल्स्ट-वेलजियमवास्तव्यः १३.२.९६ दिनाङ्के-एष महानुभावः आगन्तुकपत्रिकायां लिखति–प्रभावोत्पादकम् । अन्ततो मया तत्स्थानमुपलब्धं यत्र अनुचित-रूपेणोपेक्षितायाः पुराणपरम्परायाः उचितमध्ययनं क्रियते । पुराणम् पत्रिकाया पाश्चात्य-प्राच्यविद्याविद्भिः क्वचिदेवाध्ययनमुद्धरणं वा क्रियते । आशासे मम साहाय्येन अस्याः स्थितेः परिवर्तनं भविष्यति

४. जुवान आर. युत्से-माड्रिडवास्तव्यः

५. श्री बी. पी. सिंहः–भारतशासनस्य मानवसंसाधनमन्त्रालयस्य संस्कृतिविभागस्य सचिवः १३.४.९६ दिनाङ्के

६. डा. ली ए. शिगेल हवाई विश्वविद्यालये भारतीयधर्मस्य प्राध्यापकः २५.६.९६ दिनाङ्के–एष महानुभावः लिखति-न्यासेन क्रियमाणस्य महत्कार्य कृते मम प्रशंसनम् ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सहयोगिन्यासानां कार्यविवरणम्

१. महाराजबनारस विद्यामन्दिरन्यासः

ध्रुपदमेला

महाराजबनारस विद्यामन्दिर न्यासेन आयोजिताया ध्रुपदमेलाया द्वाविंशमायोजनं वाराणस्यां तुलसीघट्टे ध्रुपदतीर्थे १५-१७ फरवरी १९९६ ई. दिनाङ्केषु संपन्नम् । मेलाया उद्घाटनं श्रीमद्भिर्युवराजैः श्रीअनन्तनारायणसिंहमहोदयैः कृतम् । तैः ध्रुपदगायनस्य महत्वं प्रतिपादितं तथास्याः-मेलायाः प्रभावस्यापि प्रतिपादनं कृतम् । मेलायाः आयोजने प्रोफेसर वीरभद्रमिश्रस्य सहयोगार्थ युवराजैः तस्य प्रशंसनं कृतम् । उद्घाटनावसरे अनेके विशिष्टपुरुषाः ध्रुपद कलाकाराश्चोपस्थिता आसन् । मेलायां प्रायशो सप्ततिः ध्रुपदकलाकारा सम्मिलिता बभूवुः येषु प्रमुखाः– पं. सियारामतिवारी, श्रीसुकदेव पवारः, उस्ताद सईदुद्दीन डागरः, प्रेमकुमार मल्लिकः, प्रो. राजभानसिंहः, डा. ऋत्विक् सान्याल इत्यादयः ।

२. महाराज उदितनारायण सिंह मानस प्रचारनिधिः

नवाहपारायणन्

अस्य न्यासस्य तत्वावधाने चकिया नगर स्थिते कालीमन्दिरे रामचरितमानस्य नवाहपारायणं प्रवचनं च सम्पादितम् । पारायणं वैशाखशुक्लद्वितीयातिथिमारभ्य दशमीतिथिपर्यन्तं (१८ अप्रैल १९९६ तः २९ अप्रैल १९९६ यावत्) संपन्नम् । प्रमुखाः व्यासाः रामचरितमानसविषये प्रवचनं कृतवन्तः । प्रवचने श्रोतॄणां संख्या विपुला आसीत् । तत्रभवन्तः काशिनरेशा डा. विभूतिनारायणसिंहशर्मदेवाः प्रवचनेषु उपस्थिता आसन् । पारायणसमाप्तौ भण्डारा आयोजिता आसीत् ।

●

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥ श्रीवासिष्ठलिङ्गपुराणम् ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अथ श्रीवासिष्ठलिङ्गपुराणम्

१

श्रीगणेशाय नमः*

श्रीमत्कैलासमागम्य वसिष्ठो वेदविन्मुनिः ।
तपश्चचार सत्कर्मनिरतो नियतेन्द्रियः ॥ १ ॥

दिव्यं वर्षसहस्रं स वायुभक्षोऽग्निमध्यगः ।
श्रीमत्पञ्चाक्षरं साक्षाच्छतरुद्रियमध्यगम् ॥ २ ॥

सर्वपापहरं पुण्यं प्रणवेन षडक्षरम् ।
जजाप शंकरं द्रष्टुं वाञ्छया मुनिसत्तमः ॥ ३ ॥

ततः प्रसन्नो भगवानम्बया सह शंकरः ।
लिङ्गज्योतिःस्वरूपेण पुरतोऽस्य प्रकाशितः ॥ ४ ॥

मुनिश्च विस्मयाविष्टः किमेतत् पुरतः स्थितम् ।
इति संचिन्त्य सर्वात्मा भगवान् परमेश्वरः ॥ ५ ॥

स्वशक्तिवैभवादत्र प्रादुरासीदिति स्मरन् ।
प्रणम्य वाङ्मनःकायैर्भक्त्या युक्तो महामुनिः ॥ ६ ॥

पूजयामास देवेशं पत्रपुष्पफलोदकैः ।
पुनश्चेशः प्रकाशेऽस्मिन् प्रसन्नो भक्तवत्सलः ॥ ७ ॥

दक्षिणामूर्तिमास्थाय प्रत्यक्षमभवन्मुनेः ।
वसिष्ठो देवमालोक्य वटच्छायानिषेविणम् ॥ ८ ॥

---

* दे$_1$श्री गणेशाय नमः । श्री शारदायै नमः ।

१. –d) दे$_2$ तिरतो नियतोदयः .

२. –a) दे$_{1-3}$ तु (→स).

३. –a) दे$_3$ °ह * (→ °हरं). –c) दे$_{2.3}$ शंकर– (→शंकरं).

८.. –b) दे$_1$ मुनिः (→मुनेः) –d) दे$_2$ °निषेरिणं (→°निषेविणं).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

व्याघ्रचर्माम्बरधरं ज्ञानमुद्राधरं हरम् ।
अक्षमालाधरं देवं भस्माधारं च पुस्तकम् ॥ ९ ॥

हैरण्यामृतकुम्भं च गङ्गाचन्द्रकलां तथा ।
दधानं सर्वदेवेशं सर्वाभरणभूषितम् ॥ १० ॥

पार्श्वस्थितं वृषं देवं नीलग्रीवं त्रिलोचनम् ।
प्रलम्बितजटाबन्धं भस्मदिग्धतनूरुहम् ॥ ११ ॥

गोक्षीरधवलाकारं पूर्णचन्द्रनिभाननम् ।
योगपट्टाभिरामं तं नागयज्ञोपवीतिनम् ॥ १२ ॥

वीरासनसमासीनं विश्वलोकैकनायकम् ।
अपस्मारोपरिन्यस्तपादपङ्कजमीश्वरम् ॥ १३ ॥

सर्वलक्षणसंपन्नं नागाभरणभूषितम् ।
सनकादिमहायोगि-सेवितं सर्वकारणम् ॥ १४ ॥

पपात दण्डवद् भूमौ भक्त्या युक्तोऽम्बिकापतिम् ।
देवोऽपि करुणां प्राप्तो मुनिमालोक्य सुव्रतम् ॥ १५ ॥

प्राह गम्भीरया वाचा किमर्थं तप्तवांस्तपः ।
प्रसन्नोऽहं तवातीव मुने वेदविदां वर ॥ १६ ॥

९.. –b) दे$_2$ °मुद्राधर-(→°मुद्राधरं).

१०. –a) दे$_1$ हिरण्या° (→हैरण्या°); दे$_2$ °कुभ, दे$_3$ °कुभा (→°कुम्भं). –b) दे$_2$ °चंदकल-, दे$_3$ °चन्द्रकलं (→°चन्द्रकलां) .

११. –c) दे$_2$ पलंवित° (→प्रलम्बित°).

१२. –a) दे$_{2.3}$ °कार- (→°कारं). –b) दे$_3$ पूर्णचन्द्रि° (→पूर्णचन्द्र°); दे$_2$ °मिभाननं (→°निभाननं). –c) दे$_2$ °परामिराम– (→°पट्टाभिरामं). –d) दे$_2$ वामा–(→नाग°) .

१३. –d) दे$_2$ ईश्वर (→ईश्वरं).

१४. –c) दे$_3$ °सेवित (→°सेवितं).

१५. –b) दे$_3$ °पतिः (→°पतिम्).

१६. –c) दे$_3$ तपतास्° (→तप्तवांस्); दे$_2$ कितं सर्व काण प्रनास्तपः (?).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

काङ्क्षितं सकलं प्राज्ञ तव दास्याम्यनुग्रहात् ।
इत्युक्तो मुनिशार्दूलो वसिष्ठः प्रीतमानसः ॥ १७ ॥

प्रणम्य दण्डवद् धीमान् भक्त्या परमया युतः ।
स्तोत्रैः स्तुत्वा महादेवं पप्रच्छाशेषमीश्वरम् ॥ १८ ॥

वसिष्ठ उवाच

भगवन् देव देवेश सर्वलोकैकनायक ।
सत्यचैतन्यसंपूर्ण परमानन्दलक्षण ॥ १९ ॥

किं कारणमशेषस्य जगतः परमेश्वर ।
कोऽधिष्ठाता तयोरुक्तः कः संबन्धो महेश्वर ॥ २० ॥

कथं च तज्जगत्सर्वं चेतनाचेतनात्मकम् ।
किं तत्परतरं तत्त्वं यस्मान्नास्ति परं शिव ॥ २१ ॥

किं लक्षणं तत्परमं का वा मूर्तिः परस्य तु ।
का वा मुक्तिर्महादेव कस्य मुक्तिः प्रकीर्तिता ॥ २२ ॥

को वा बन्धो महादेव किं वा मोक्षस्य लक्षणम् ।
कानि स्थानानि देवस्य प्रियाणि परमेश्वर ॥ २३ ॥

कीदृशो भगवन् धर्मः कीदृशो धर्म उच्यते ।
किं प्रमाणं महादेव कथं पूज्यो महेश्वरः ॥ २४ ॥

---

१८. –c) दे$_2$ महादेव (→महादेवं).

१९. –a) दे$_2$ दे * श (→देवेश). –d) दे$_{2.3}$ °लक्षणं (→°लक्षण).

२०. –d) दे$_2$ क, दे$_3$ कं (→कः); दे$_2$ सबधो (→संबन्धो).

२१. –a) दे$_2$ कथ (→कथं). –c) दे$_2$ कि (→किं). –d) दे$_2$ पर (→परं); दे$_1$ शिवं (→शिव).

२२. –a) दे$_2$ किलक्षपातस्परमं –d) दे$_2$ प्रकीर्तिताः (→प्रकीर्तिता).

२३. –a) दे$_2$ बधो (→बन्धो). –c) दे$_3$ स्था * नि (→स्थानानि).

२४. –a) दे$_1$ हि भवेद् (→भगवन्). –d) दे$_2$ कथ (→कथं); दे$_3$ महेश्वर (→महेश्वरः).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

को वा पूजाविशेषोऽस्य फलभेदो महेश्वर ।
किं भस्मोक्तं महादेव केन भस्मेति कीर्तितम् ॥ २५ ॥

किं तत् कतिविधं प्रोक्तं केषां धार्यं महेश्वर ।
केन मन्त्रेण तद्भस्म धार्यं देव नरैः सदा ॥ २६ ॥

कीदृशं धारणं प्रोक्तं कीदृशं धारणा मता ।
किं फलं धारणस्यास्य प्रोक्तं वेदेषु शंकर ॥ २७ ॥

रुद्राक्षधारणं कुत्र प्रोक्तं देव वृषध्वज ।
केन मन्त्रैण देवेश कया भावनयेरितम् ॥ २८ ॥

केषां धार्यं महादेव किं फलं धारणस्य च ।
किं जप्यं ब्राह्मणैर्नित्यं विशेषेण महेश्वर ॥ २९ ॥

जपः केन प्रकारेण पुरश्चर्या च कीदृशी ।
किं फलं जपमात्रेण नरः प्राप्नोति निर्मलम् ॥ ३० ॥

कथं वर्णाश्रमाचारः प्रोक्तो वेदेषु शंकर ।
युगधर्माः कथं प्रोक्ताः सर्वदा भक्तवत्सल ॥ ३१ ॥

कथं दारुवनं प्राप्तो भगवान् नीललोहितः ।
किं कृतं मुनिभिस्तत्र देवदेवेन किं कृतम् ॥ ३२ ॥

किमर्थं शंकरः साक्षाद् देवदारुवनं गतः ।
किमुक्तं तत्र देवेन मुनिभ्यः परमेश्वर ॥ ३३ ॥

---

२५. –d) दे$_2$ भस्मे विक्री °, दे$_3$ भस्मैति कि° (→भस्मेति की°).

२६. –a) दे$_3$ °विध (→ °विधं). दे$_{1.2}$ c चरणात्पूर्वमधिकम्– किं भस्मोक्त महा.

२७. –d) दे$_2$ शकर (→शंकर).

२८. –d) दे$_3$ °रितां (→ °रितम्).

२९. –b) दे$_3$ वा (→च).

३०. –c) दे$_2$ ध्वोकिं (→किं). –d) दे$_1$ नरः प्राप्नोत्यनर्गलः.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ऋभुं ब्रह्मा कथं पुत्रं जनयामास शंकर ।
ऋभुंश्चेत्स निदाघाय कथं ब्रह्मोपदिष्टवान् ॥ ३४ ॥

कथमिन्द्रपदं प्राप्तः शूद्रो दुष्कृतकर्मकृत् ।
तेन विद्या कथं लब्धा ब्रूहि मे सर्वमीश्वर ॥ ३५ ॥

इति ब्रह्मर्षिणा पृष्टो भगवान् भक्तवत्सलः ।
प्राह सर्वं क्रमेणैव शंकरः शशिभूषणः ॥ ३६ ॥

इत्युपपुराणे वासिष्ठलिङ्गे प्रथमोऽध्यायः ॥ १ ॥

---

३४. –c) दे$_{1.2}$ ऋ भुश्चे स (→ऋभुश्चेत्स); दे$_{3}$ निदाघोयं (→निदाघाय).

३५. –c) दे$_{2}$ नब्धा (→लब्धा) .

पुष्पिका– दे$_{2.3}$ °लैङ्गे (→°लिङ्गे).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२

ईश्वर उवाच*

कारणं जगतो माया प्रोक्ता वेदान्तवेदिभिः ।
अधिष्ठाता महेशानस्तच्च मायावशान्मम ॥ १ ॥

सा च मत्तः पृथङ् नास्ति वस्तुवृत्तेन सुव्रत ।
तथापि सत्यवद्भाति मत्सता योगहेतुना ॥ २ ॥

अचिन्त्य एव संबन्धः सर्वदा मुनिसत्तम ।
तथापि मुनिशार्दूल मन्मायेत्यब्रवीच्छ्रुतिः ॥ ३ ॥

प्राणिनां कर्मपाकेन कालपाकेन सुव्रत ।
गुणत्रयात्मना माया विभक्ता प्रलयं गता ॥ ४ ॥

महान् जायेत मायायाः सत्त्वक्षोभान्ममाज्ञया ।
तेनाहमीक्षे सर्वज्ञः स्रष्टव्यं सकलं मुने ॥ ५ ॥

सृजामि सकलं प्राज्ञ इदं शक्तेस्तु वैभवात् ।
ततः सत्त्वगुणं गत्वा विष्णुसंज्ञोऽहमीश्वरः ॥ ६ ॥

पालयामि जगत्कृत्स्नं मुने मच्छक्तिवैभवात् ।
संहरामि जगत्सर्वं तमसा वशवर्तिना ॥ ७ ॥

२

* दे$_{2.3}$ श्रीईश्वरोवाच.

१. –c) दे$_3$ महिशानस् (→महेशानस्).

३. –a) दे$_3$ एष (→एव). –b) दे$_3$ * त्तम (→–सत्तम). –d) दे$_2$ त्रवीछृतिः (→ब्रवीच्छ्रुतिः).

४. –a) दे$_2$ प्राणिवां, दे$_3$ प्राणीनां (→प्राणिनां). –b) दे$_3$ °पा [के] न (→°पाकेन). –c) दे$_1$ °लयात्मनी (→°त्रयात्मना). –d) दे$_2$ विभक्ता प्रकृयंगन.

५. –a) दे$_2$ महान्ता येन मायाया.

७. –a) दे$_1$ सर्व- (→कृत्स्नं). –b) दे$_{2.3}$ मुनि- (→मुने). –c) दे$_1$ कृत्स्नं (→सर्वं).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रुद्रसंज्ञोऽहमीशानो मन्मायावैभवेन हि ।
ब्रह्माऽप्यनेकधा भिन्नो गुणवैषम्यतो मुने ॥ ८ ॥

विष्णुश्च बहुधा भिन्नस्तथा रुद्रोऽप्यनेकधा ।
मायायाः शब्द उद्भूतो मन्नियोगान्महामुने ॥ ९ ॥

शब्दाद् वेदो मया दध्नो नवनीतमिवोद्‌धृतः ।
पुनः शब्दात् समुत्पन्नः स्पर्शतत्त्वं महामुने ॥ १० ॥

स्पर्शाद् रूपं रसस्तस्माद् गन्धस्तस्माद् समुद्बभौ ।
एषु भूतेषु वै ब्रह्मन् जायन्ते पञ्चमूर्तयः ॥ ११ ॥

तत्र सर्वज्ञतापन्नः शब्दजां मूर्तिमागतः ।
ईक्षितृत्वं गतो देवः स्पर्शतां मूर्तिमागतः ॥ १२ ॥

रुद्रसंज्ञस्य देवस्य रूपे मूर्तिः प्रजायते ।
तेन विप्र रसे क्षिप्तं वीर्यं मूर्त्यभिमानिना ॥ १३ ॥

तदण्डमभवद्धैमं सहस्रकिरणप्रभम् ।
विष्णुस्तत्राविशद् ब्रह्मन् मम शक्तेस्तु वैभवात् ॥ १४ ॥

पुनर्नारायणाख्यां मे नियोगात् प्राप्तवानसौ ।
इदं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ॥ १५ ॥

---

८. –b) दे$_{2.3}$ च (→हि).

९. –c) दे$_1$ मायया, दे$_2$ मायायां (→मायायाः); दे$_{2.3}$ उद्भूता (→उद्भूतो). –d) दे$_1$ मत्प्रियोगान् (→मन्नियोगान्).

१०. –d) दे$_1$ °मिवोद्धुतः दे$_2$ °मिवोद्वतः, (→°मिवोद्‌धृतः). –c) दे$_1$ समुत्पन्न- (→समुत्पन्नः).

१२. –b) दे$_3$ [°मा] गतः (→–°मागतः) –d). दे$_{2.3}$ आविशत् (→आगतः). –cd) दे$_2$ ईक्षितृचं सगनो दे च स्पर्शजां मूर्तिमाविशत् .

१४. –b) दे$_1$ °किरणं, दे$_2$ °किरणे (→°किरण-). –d) दे$_2$ वैभवान् (→वैभवात्).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आपः सूक्ष्मः रसः प्रोक्तो रसो नारः प्रकीर्तितः ।
नाराज्जातस्ततो ब्रह्मन् नरः साक्षाज्जनार्दनः ॥ १६ ॥

नारमस्यायनं प्रोक्तं तेन नारायणः स्मृतः ।
ब्रह्माऽपि मुनिशार्दूल गन्धजां मूर्तिमाविशत् ॥ १७ ॥

ईश्वरः स्पर्शमूर्तिः स्याच्छन्दमूर्तिः सदाशिवः ।
रुद्रस्तेजोमयः साक्षाद् रसमूर्तिर्जनार्दनः ॥ १८ ॥

गन्धमूर्तिश्चतुर्वक्त्रः इत्येताः पञ्चमूर्तयः ।
एवं मूर्तिषु जातास्ते पञ्चभूतेषु सुव्रत ॥ १९ ॥

सर्वेन्द्रियाणां प्राणानां जायन्ते पञ्चमूर्तयः ।
एता हिरण्यगर्भस्य कूटस्थस्य महात्मनः ॥ २० ॥

अन्तःकरणदेहस्य प्राणाश्च करणानि च ।
ब्रह्मा हिरण्यगर्भोऽभूत् तस्य प्राणो हरिः स्वयम् ॥ २१ ॥

सूत्रात्माऽभून्महादेवस् तयोरन्तर्नियामकः ।
पुनश्च मुनिशार्दूल ब्रह्माण्डं मन्नियोगतः ॥ २२ ॥

पञ्चभ्यः स्थूलभूतेभ्यो जायते स्वप्नलोकवत् ।
पुनर्नारायणो देवो मदाज्ञावशमागतः ॥ २३ ॥

---

१६. –a) दे$_{1-3}$ सूक्ष्मो (→सूक्ष्मः).–b) दे$_2$ रेसो (→रसो). –c) दे$_2$ °जात च तो, दे$_3$ °जातवत्तो (→°जातस्ततो).

१७. –b) दे$_3$ स्मृताः (→स्मृतः).

१९. –a) दे$_1$ °वक्त्र (→°वक्त्रः). –b) दे$_{1.3}$ इत्येता (→इत्येताः). –c) दे$_1$ एव (→एवं). –d) दे$_2$ सुव्रताः (→सुव्रत).

२०. –a) दे$_2$ सर्वे°(→सर्वे °). –b) दे$_1$ जायते (→जायन्ते).

२२. –a) दे$_3$ महादेवैः (→महादेवस्). –b) दे$_1$ नियामक (→नियामकः)

२३. –a) दे$_3$ पंचभ्य (→पञ्चभ्यः). –d) दे$_{1.2}$ ममाज्ञा° (→मदाज्ञा°).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हिरण्यगर्भं स्त्रीरूपं कारयित्वा तु मायया ।
तस्यां विराजमसृजन्मुने ब्रह्माण्डविग्रहम् ॥ २४ ॥

स्वराड्भाभ्यामुत्पन्नः सम्राट् चैव तथा मुने ।
अण्डमध्ये मुनिश्रेष्ठ भुवनानि ममाज्ञया ॥ २५ ॥

उद्भिद्यन्ते मुनिश्रेष्ठ जीवाः कर्मानुरूपतः ।
सृष्टिरुक्ता मया ब्रह्मन् जगतः संग्रहेण तु ॥
सर्वं मायामयं बुद्ध्वा विसृजात्मविशुद्धये ॥ २६ ॥

इत्युपपुराणे वासिष्ठलिङ्गे द्वितीयोऽध्यायः ॥ २ ॥

---

24. –a) दे$_1$ स्तीन्° (→स्त्री°). –d) दे$_1$ °विग्रहः (→°विग्रहम्).

25. दे$_1$. पुस्तके 25 d.- 26. a Θ –a) दे$_1$ स्वचाड्° (→स्वराड्°).–b) दे$_2$ सम्राडपि, दे$_3$ सम्राट्चापि (→सम्राट् चैव).

26. दे1. Θ–d) दे$_3$ ज ** (→जगतः) ; दे$_2$ ते (→तु).
पुष्पिका– दे$_{2.3}$ °लैङ्गे (→°लिङ्गे).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३

ईश्वर उवाच*

शिव एव परं तत्त्वं ततो नास्त्यधिकं मुने ।
तल्लक्षणं महाप्राज्ञ श्रुतिषु श्रूयते सदा ॥ १ ॥

सत्यं ज्ञानं सुखानन्तं जगत्सर्गादिकारणम् ।
मूर्तिरस्य मुनिश्रेष्ठ शिरसि श्रूयते श्रुतेः ॥ २ ॥

उमया सहिता नित्या नीलग्रीवा त्रिलोचना ।
स्वात्मतत्त्वसुखस्फूर्तिमुदिता ताण्डवप्रिया ॥ ३ ॥

ब्रह्मविष्णुमहेशानैरुपास्या सर्वदा मुने ।
भोगमोक्षप्रदा पुण्या पुंसां वेदविदां वर ॥ ४ ॥

सैव मे परमा मूर्तिरुपास्या सर्वदा तव ।
अविद्याया निवृत्तिर्या सैव मुक्तिः प्रकीर्तिता ॥ ५ ॥

अज्ञस्यैव हि मुक्तिः स्यादज्ञानात् तस्य बन्धनात् ।
अज्ञानपाशबद्धत्वादमुक्तः पुरुषः सदा ॥ ६ ॥

---

* दे$_{2.3}$ श्रीईश्वर उवाच.

१. –b) दे$_3$ [अ] धिक–(→[अ]धिकं).

२. –d) दे$_1$ शिरं श्रु श्रुयते [यते] .

३. –b) दे$_2$ विलोचन (→त्रिलोचना).

४. –c) दे$_3$ पुण्यां (→पुण्या). –d) दे$_{2.3}$ पुंसो (→पुंसां).

६. –a) दे$_3$ मुक्ति (→मुक्तिः). –c) दे$_1$ °बंधत्वात् (→°बद्धत्वाद्).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ज्ञानात् तस्य विनाशः स्याद् ज्ञानं वेदान्तवाक्यजम् ।
यज्ञादीनि च कर्माणि ज्ञानेच्छायाश्च कारणम् ॥ ७ ॥

श्रीमत्कैलासमचलं सर्वदा भुक्तिमुक्तिदम् ।
सर्वदेवसमाकीर्णं सर्वगन्धर्वसेवितम् ॥ ८ ॥

सर्वसिद्धसमाकीर्णं सर्वजन्तुसमावृतम् ।
विद्धि मे सततं ब्रह्मन्नतीव प्रियमुत्तमम् ॥ ९ ॥

वाराणसी पुरी पुण्या मरणादेव मुक्तिदा ।
देवासुरमुनीन्द्रैश्च सेव्यमाना प्रिया मम ॥ १० ॥

श्रीमद् व्याघ्रपुरं पुण्यं सर्वलोकेषु विश्रुतम् ।
दर्शनादेव सर्वेषां भुक्तिमुक्तिफलप्रदम् ॥ ११ ॥

ब्रह्मविष्णुसुरेन्द्राद्यैः सेव्यमानं महामुने ।
पतञ्जलिसमाख्येन नागराजेन सुव्रत ॥ १२ ॥

व्याघ्रपादेन च ब्रह्मन् जन्मान्तरतपोबलात् ।
यत्र वृत्तं पुरा दृष्टं तन्मे नित्यं प्रियं मम ॥ १३ ॥

श्रीमद्वल्मीकमाश्चर्यं जन्तूनां मुक्तिदं नृणाम् ।
लक्ष्मीर्यत्र पुराराध्य मामवाप्ताचिरेण तु ॥ १४ ॥

---

७ –a) दे$_2$ ज्ञाना (→ज्ञानात्); दे$_1$ स्यान् (→स्याद्). –b) दे$_1$ हानं (→ज्ञानं).
–d) दे$_2$ ज्ञानेछायास्तु, दे$_3$ ज्ञानेछायस्तु (→ज्ञानेच्छायाश्च).

९. –a) दे$_1$ सर्वसिद्धि° (→सर्वसिद्ध°). –b) दे$_3$ सर्व [जा]तु° (→सर्वजन्तु°); दे$_2$ सर्वज[न्तु] समावृतः –c) दे$_1$ सतत (→सततं). –d) दे$_3$ प्रि[यं] (→प्रियम्).

१०. –c) दे$_3$ मनीन्दैश्च (→मुनीन्द्रैश्च).

११. –a) दे$_3$ श्रीम (→श्रीमद्) –b) दे$_2$ विशृतं (→विश्रुतं).

१२. –d) दे$_2$ सुव्र [त] (→सुव्रत).

१३. –b) दे$_2$ जस्वन्मांतर° (→जन्मान्तर°); दे$_3$ °बलत् (→°बलात्). –c) दे$_{2.3}$ नृतं (→वृतं); दे$_3$ पु [रा] (→पुरा). –d) दे$_{2-3}$ मुने (→मम) .

१४. –b) दे2.3 जननान् (→जन्तूनां). –d) दे$_3$ मामवा [प्ता] (→मामवाप्ता-).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पुरा सर्वेषु नष्टेषु प्रलये मुनिपुंगव ।
दृष्ट्वा तु सुस्थितमिदं कस्येदमिदमुत्तमैः ॥ १५ ॥

स्मरणादेव पापघ्नं तन्मे ब्रह्मन् प्रियं सदा ।
पम्पातीरे मुनिश्रेष्ठ पुरं काञ्चीति विश्रुतम् ॥ १६ ॥

आराधितः पुरा देव्या यत्राहं भक्तियुक्तया ।
यत्र साक्षान्महादेवी नित्यं सन्निहितादरात् ॥ १७ ॥

यत्रोपवासमेकं वा कुर्वाणा मुक्तिमाप्नुयुः ।
तन्मे साक्षात् प्रियं विद्धि पुरं वेदान्तवित्तम ॥ १८ ॥

श्रीपर्वतो महाशैलः श्रीसदाशिवविग्रहः ।
सिद्धैश्च साधकैश्चैव सेवितः सर्वसिद्धिदः ॥ १९ ॥

यत्र देवो महादेवो वाङ्मनोऽगोचरो हरः ।
दृश्यते ज्योतिरूपेण सोऽपि नित्यं प्रियो मम ॥ २० ॥

श्रीमद्ब्रह्मपुरं नाम त्रिषु लोकेषु विश्रुतम् ।
कल्पे कल्पे पुरा ब्रह्मन् ब्रह्मणाराधितं पुरा ॥ २१ ॥

मुनिभिः सिद्धगन्धर्वैः सेवितं सर्वदादरात् ।
यत्र भक्तिमतां देवो ज्ञानं सम्यक् प्रयच्छति ॥ २२ ॥

यत्र नावं समारुह्य प्रलये दिवि संस्थिताः ।
तन्मे प्रियतरं विद्धि स्थानं ब्रह्मविदां वर ॥ २३ ॥

---

१५. –a) दे$_{2.3}$ पुरा सर्वे विनष्टेपि. –d) दे$_{2.3}$ कस्येदमिति सत्तमैः .
१६. –c) दे$_{2}$ कंपातीरे (→पम्पातीरे).
१७. –d) दे$_{2}$ नित्य-(→नित्यं).
१८. –d) दे$_{2.3}$ मुने (→पुरं).
१९. –c) दे$_{1\text{-}3}$ °र्नित्यं (→°श्चैव). –d) दे$_{2}$ सेविता (→सेवितः).
२१. –d) दे$_{2.3}$ मुदा (→पुरा).
२२. –a) दे$_{3}$ °गंधर्वे (→°गन्धर्वैः). –b) दे$_{1}$ सेवित-(→सेवितं). –d) दे$_{2}$ प्रयवति, दे$_{3}$ प्रयेवति (→प्रयच्छति).
२३. –b) दे$_{3}$ प्रलय [दि] वि संस्थिताः.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्वेतारण्यं महातीर्थं कावेर्या उत्तरे तटे ।
यत्र साक्षाच्चतुर्दन्ती पूजयामास शंकरम् ॥ २४ ॥

पुष्कराणां त्रयं यत्र नित्यं संनिहितं मुने ।
यत्र स्नात्वा नरः षष्ठ्यां माघमासे तथैव च ॥ २५ ॥

चतुर्दश्यां तु वैशाखे तथाष्टम्यां सितेतरे ।
रवौ मिथुनमापन्ने तथा वेदविदां वर ॥ २६ ॥

आदित्ये वृश्चिकं प्राप्ते चतुर्दश्यामुपोषितः ।
यथाशक्त्यान्नपानादि दत्त्वा मुक्तिमवाप्नुयात् ॥ २७ ॥

यत्र वेदविदां श्रेष्ठ स्नात्वा पर्वणि पर्वणि ।
वत्सराल्लभतेऽभीष्टं तन्मे प्रियतरं मुने ॥ २८ ॥

मध्यार्जुनं महातीर्थं कावेर्या दक्षिणे तटे ।
यत्र विघ्नेश्वरो देवः पूजयामास शंकरम् ॥ २९ ॥

आदित्ये मकरं प्राप्ते पुष्ये वेदविदां वर ।
यत्र स्नात्वा तु कावेर्यां दत्त्वा विप्राय भोजनम् ॥ ३० ॥

अग्निदाहात् सुरापानाद् ब्रह्महत्यादिपातकात् ।
मुच्यते मुनिशार्दूल नरः स्वर्गं च विन्दति ॥ ३१ ॥

यत्र स्नात्वा तु कावेर्यां मासि मसि च पर्वणि ।
प्रदक्षिणत्रयं कृत्वा देवं दृष्ट्वाऽभिवन्द्य च ॥ ३२ ॥

---

२७. –a) दे$_3$ वृश्चिके (→वृश्चिकं). –b) दे$_2$ चतुर्दश्यम् (→चतुर्दश्याम्).

२८. –c) दे$_3$ लभ्यते (→लभते). –b) दे$_2$ प्रियतर-(→प्रियतरं).

२९. –c) दे$_2$ देवैः (→देवः).

३०. –a) दे$_1$ मकर-(→मकरं).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संवत्सरादवाप्नोति सकलं वाञ्छितं नरः ।
तन्मे साक्षात् प्रियं विद्धि समचित्त महामुने ॥ ३३ ॥

कुम्भकोणं महातीर्थं कावेर्या दक्षिणे तटे ।
नानादेवसमाकीर्णं नानामुनिसमावृतम् ॥ ३४ ॥

माघे वर्षे महाप्राज्ञ माघमासे मघादिने ।
मधुलग्ने मुनिश्रेष्ठ यत्र तीर्थानि सादरम् ॥ ३५ ॥

स्नात्वा संभूय कावेर्यां देवमाराध्य भक्तितः ।
तत्पार्श्वे दक्षिणे ब्रह्मंस्तटाके तानि सुव्रत ॥ ३६ ॥

सांनिध्यं सर्वलोकानामुपकाराय वै मुने ।
कुर्वन्ति यत्र कावेर्यां स्नात्वा पर्वण्युपोषितः ॥ ३७ ॥

दत्वाल्पमपि विप्राय शिवलोके महीयते ।
तन्मे साक्षात् प्रियं विद्धि स्थानं संसारनाशनम् ॥ ३८ ॥

जप्येश्वरं महास्थानं कावेर्या उत्तरे तटे ।
पञ्च नद्यो महापुण्या पूज्या यत्र स्थिता हरम् ॥ ३९ ॥

शिलादो यत्र सौभाग्यात् तपस्तप्त्वा महेश्वरम् ।
दृष्ट्वा संपूज्य यत्नेन त्वरितेन शिवेन च ॥ ४० ॥

---

३३. - d) $दे_3$ समचितं (→ समचित्त).

३४. -a) $दे_3$ कुम्भकोण-(→कुम्भकोणं). –c) $दे_{2.3}$ °समाकीर्णे (→°समाकीर्णं). -d) $दे_{2.3}$ °समावृते (→ समावृतम्).

३५. -b) $दे_3$ माघमासि मघे दिने. -c) $दे_{2.3}$ मध°(→मधु°).

३६. -a) दे2 कावेर्य्यं (→कावेर्यां).

३७. -a) $दे_1$ सन्निध्यं (→सांनिध्यं).

३९. -a) दे1 [ज] प्येश्वरं (→जप्येश्वरं). –c) $दे_{1.2}$ °पुण्याः (→°पुण्या).
-d) $दे_{2.3}$ पूज्य (→पूज्या); $दे_2$ तत्र (→यत्र); $दे_1$ हारा (→हरम्).

४०. -a) $दे_2$ सौभाग्या (→सौभाग्यात्). -b) $दे_1$ तप्त्वो (→तप्त्वा). -c) $दे_2$ रङ्गेण, $दे_3$ रुद्धेण (→यत्नेन). -d) $दे_1$ त्वरितेने (→त्वरितेन).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लब्धवांस्तत्प्रसादेन नन्दीशं पुत्रमात्मनः ।
यत्र संपूज्य देवेशं कृतार्थाः सप्तमातरः ॥ ४१ ॥

यत्र पूज्य महादेवं धर्मः साक्षाद् वृषोऽभवत् ।
यत्र स्नात्वा तु कावेर्यां दृष्ट्वा देवं प्रणम्य च ॥ ४२ ॥

यथाशक्ति प्रदानेन नरः साक्षाच्छिवं व्रजेत् ।
तन्मे प्रियतरं स्थानं विद्धि वेदविदां वर ॥ ४३ ॥

सेतुमध्ये मुनिश्रेष्ठ गन्धमादनपर्वते ।
साक्षाद् विष्णुर्जगन्नाथो रामो दशरथात्मजः ॥ ४४ ॥

भूत्वा लोकोपकाराय रावणं राक्षसेश्वरम् ।
हत्वा तत्पापशुध्यर्थं स्थाप्य सर्वेश्वरं पुनः ॥ ४५ ॥

रामेश्वर इति ब्रह्मन् संज्ञां चक्रे स्वनामतः ।
पुनः स्नात्वा समुद्रेऽस्मिन् गन्धमादनपर्वते ॥ ४६ ॥

पूज्य रामेश्वरं देवं भक्त्या भक्तप्रिये रतः ।
ब्राह्मणान् भोजयित्वाऽस्मिन् स्थाने रामः स्वभार्यया ॥ ४७ ॥

विलोक्य देवसङ्घांश्च मुनिसङ्घान्नरैः सह ।
प्रसादयित्वा देवेशमिदं वचनमब्रवीत् ॥ ४८ ॥

आदित्ये मकरं प्राप्ते तथा कर्कटके स्थिते ।
कन्यायां संस्थिते चार्के चन्द्रेऽप्यादित्यसंयुते ॥ ४९ ॥

---

४२. -a) दे$_3$ महावंदे (→महादेवं). -b) दे$_1$ धर्म [:] (→धर्मः;); दे$_3$ सा.[क्षाद्] (→साक्षाद्); दे$_1$ भवेत् (→-भवत्).
४३. -c) दे$_1$ प्रियतमं (→प्रियतरं). -d) दे$_3$ व [र] (→वर).
४५. -b) दे$_1$ राक्षसं रावणेश्वरं.
४६. -d) दे$_2$ °माद [नं] (→ °मादनं)
४७. -a) दे$_2$ रामेश्वरे (→रामेश्वरं). -b) दे$_{2.3}$ रतं (→रतः).
४८. -c)दे$_2$ °यिवा (→°यित्वा); दे$_3$ दे * शं (→देवेशं).
४९. -c) दे$_{2.3}$ च स्थिते (→संस्थिते).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विषुवायनयोस्तद्वत् सर्पग्रस्ते दिवाकरे ।
चन्द्रे वा राहुकेतुभ्यां ग्रस्ते केवलपर्वणि ॥ ५० ॥

अत्र स्नात्वा जितक्रोधो दृष्ट्वा रामेश्वरं नरः ।
उपोष्य ब्राह्मणान् भक्त्या भोजयित्वा यथाबलम् ॥ ५१ ॥

दत्त्वा वस्त्रं धनं भूमिं कन्यकामपि भूषिताम् ।
सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ॥ ५२ ॥

इति श्रुत्वा मुने देवा मुनयश्च नरोत्तमाः ।
तथैवास्त्विति संभूय प्राहू रामेश्वराज्ञया ॥ ५३ ॥

ततः परं महातीर्थमभवत् तन्महामुने ।
गोघ्नश्चापि कृतघ्नश्च भ्रूणहा मातृहा तथा ॥ ५४ ॥

सुरापी च गुरोर्द्रोही वेदनिन्दापरो नरः ।
परदारपरश्चैव तथान्ये पापकर्मिणः ॥ ५५ ॥

तत्र स्नात्वा शिवं दृष्ट्वा मुच्यन्ते सर्वपातकैः ।
लक्ष्मणश्च तथैवास्मिन् स्थाने वेदविदां वर ॥ ५६ ॥

लक्ष्मणेश्वर नाम्नाऽसौ स्थापयामास शंकरम् ।
तथाग्रे कल्पयत् तीर्थं नाम्ना लक्ष्मणकुण्डकम् ॥ ५७ ॥

---

५०. -d) दे3 °पर्वणे (→°पर्वणि)

५२. -a)दे1 वस्त्र-(→वस्त्रं). -b) दे2 कन्याकां-(→कन्यकां); दे3 भू [षि] तां (→भूषितां).

५३. -b) दे2.3 नरोत्तमां (→नरोत्तमाः). -c) दे2 संश्रूय (→संभूय). -d) दे3 °रज्ञया (→°राज्ञया).

५४. -b) दे2.3 अभव (→अभवत्). -d) दे2.3 भूणहा (→भ्रूणहा).

५६. -c) दे3 अस्मि (→अस्मिन्). -d) दे2 विदावरः (→विदांवर)

५७. -b) दे3 स्थाप [या] मास शंकरं. -c) दे2 तस्याग्रे (→तथाग्रे); दे 1 कल्पयेत् (→कल्पयत्). दे2 कुंडकां (→कुंडकं).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तत्तीर्थे वपनं कृत्वा शिरोमात्रं शिवाज्ञया ।
विसृज्यात्रैव रोमाणि स्नात्वा भक्त्या त्रयम्बकम् ॥ ५८ ॥

लक्ष्मणेश्वरमीशानं दृष्ट्वा स्तुत्वा प्रणम्य च ।
यथाशक्तिप्रदानेन नरः शिवपुरं व्रजेत् ॥ ५९ ॥

सुग्रीवश्चाङ्गदश्चैव हनुमान् मारुतात्मजः ।
यत्र सर्वेश्वरं भक्त्या प्रतिष्ठाप्य स्वनामभिः ॥ ६० ॥

पूजयामासुरीशानं राघवस्याज्ञया मुने ।
तन्मे साक्षात् प्रियं विद्धि स्थानं सर्वार्थसाधनम् ॥ ६१ ॥

सोमनाथं महास्थानं सोमेनैव प्रतिष्ठितम् ।
यद् दृष्ट्वा जायते जन्तुर्न पुनर्भुवि सुव्रत ॥ ६२ ॥

तन्मे प्रियतमं विद्धि सर्वकामफलप्रदम् ।
केदारं तु महास्थानं केदारेण प्रतिष्ठितम् ॥ ६३ ॥

भोगमोक्षप्रदं पुंसां दर्शनादेव सुव्रत ।
गङ्गायां पूज्य देवेशं कृतार्था सागरं गता ॥ ६४ ॥

तन्मे प्रियतरं विद्धि स्थानं सर्वफलप्रदम् ।
भीमेश्वरं महापुण्यं भीमेनापि सुपूजितम् ॥ ६५ ॥

---

५८. -a) दे$_3$ तत्तीर्थ-(→तत्तीर्थे). -b) दे$_{2.3}$ शिरौमात्रं (→शिरोमात्रं). -d) दे$_{1.2}$ त्रियंबकं (→त्रयम्बकम्).

५९. -c) दे$_2$ प्रदातेन (→प्रदानेन). -d) दे$_3$ ब्रह्मजेत् (→व्रजेत्).

६०. -b) दे$_2$ ह्यनुमान् (→हनुमान्).

६२. -a) दे$_{2.3}$ महातीर्थं (→महास्थानं).

६३. -a) दे$_{2.3}$ प्रियतरं (→प्रियतमम्).

६४. दे$_3$ पुंसा (→पुंसां). -c) दे$_2$ गंगायं (→गङ्गायां).

६५. -a) दे$_3$ तिद्धि (→विद्धि). -c) दे$_3$ भीमेश्वर-(→भीमेश्वरं).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गोदावरी महापुण्या यं पूज्यैव वरप्रदा ।
यं दृष्ट्वा सर्वपापेभ्यो मुच्यते मानवो मुने ॥ ६६ ॥

तन्मे प्रियतमं विद्धि स्थानं वेदान्तवित्तम ।
श्रीमद्वृद्धाचलं स्थानं शिवस्येष्टतमं सदा ॥ ६७ ॥

एकोदके निरालम्वं जलस्योपरि संस्थितम् ।
मणिमुक्तानदीतीरे दक्षिणे मुनिपुंगव ॥ ६८ ॥

अगत्स्योऽपि पुरा ब्रह्मन्नाराध्यात्र महेश्वरम् ।
अत्युन्नताचलत्वेन नराणां दृष्टिगोचरम् ॥ ६९ ॥

अत्यल्पमकरोल्लोकहितार्थाय मुने सदा ।
यत्र दृष्ट्वा महादेवं श्रीमद्वृद्धाचलेश्वरम् ॥ ७० ॥

स्तुत्वा नत्वा मुने जन्तुर्न पुनर्जायते भुवि ।
यत्र नद्याममावास्यां स्नात्वा श्रद्धापुरस्सरः ॥ ७१ ॥

यथाशक्ति धनं धान्यमन्यद्वा शिवयोगिनः ।
दत्त्वा प्रदक्षिणीकृत्य श्रीमद्वृद्धाचलेश्वरम् ॥ ७२ ॥

दृष्ट्वा स्तुत्वा मुने जन्तुर्न पुनर्जायते भुवि ।
यत्रादित्यस्य वारे तु मणिमुक्तानदीजले ॥ ७३ ॥

---

६६. -b) दे$_2$ पूज्यै [व] (→पूज्यैव):
६७. -a) दे$_{2.3}$ प्रियतरं (→प्रियतमं). -b) दे$_{2.3}$ स्नानं (→स्थानं). -c) दे$_2$ श्रीमद्बच्द्धाचलस्वानं.
६८. -a) दे$_2$ निध्यरालंवे, दे$_3$ निरालवे (→निरालम्वं); दे$_1$ एकोदर्के निरालंबे. -d) दे$_{2.3}$ °पुंगवः (पुंगव).
७०. -b) दे$_2$ हितार्याय (→हितार्थाय). -c) दे$_2$ यव (→यत्र). -d) दे$_2$ °चलेस्थितं (→°चलेश्वरम्); दे$_3$ श्रीम [वृ] द्धाचले स्थितं.
७१. -c) दे$_3$ अमावस्यां (→अमावास्यां). -d) दे$_3$ [श्र] द्धा- (→श्रद्धा-); दे$_{2.3}$ -पुरःसरं (→पुरस्सरः).
७२. -b) दे$_{1-3}$ °योगिने (→°योगिनः). -c) दे$_3$°* त्य (→°कृत्य).
७३. -a) दे$_{2.3}$ नत्वा (→स्तुत्वा).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्नात्वा दत्त्वा यथाशक्ति वस्त्रं वा स्वर्णमेव च ।
तिलं वा तण्डुलं वापि विदुषे ब्राह्मणाय च ॥ ७४ ॥

श्रीमद्वृद्धाचलेशाय नरः साक्षाच्छिवं व्रजेत् ।
यत्र वेदविदां श्रेष्ठ मघर्क्षे माघमासि च ॥ ७५ ॥

अस्यां नद्यां रवौ चापि स्थिते चन्द्रदिने नरः ।
मया सार्धं मुने स्नात्वा यथाशक्ति धनं मुदा ॥ ७६ ॥

दत्त्वा भुक्तिं च मुक्तिं च ब्रह्मन्नाप्नोत्यनर्गलम् ।
यत्र तीर्थे मुने भक्त्या मुष्टिमात्रं ददाति यः ॥ ७७ ॥

इह लोके सुखी भूत्वा प्रेत्य रुद्रं स गच्छति ।
तन्मे प्रियतरं स्थानं विद्धि वेदविदां वर ॥ ७८ ॥

गोपर्वतं महास्थानं गोभिर्नित्यं प्रपूजितम् ।
श्रीमद्वृद्धाचलस्यास्य ब्रह्मन्नुत्तरतः स्थितम् ॥ ७९ ॥

यत्र देवी मया सार्द्धं क्रीडते सततं मुदा ।
यत्र गोपर्वतेशानमर्कवारे च पर्वणि ॥ ८० ॥

विषुवायनकालेषु सुमुहूर्तेऽथवा नरः ।
प्रदक्षिणत्रयं कृत्वा प्रणम्य भुवि दण्डवत् ॥ ८१ ॥

यथाशक्ति धनं दत्त्वा ब्राह्मणायानघाय च ।
तथा गोपर्वतेशाय विदुषे वेदवित्तम ॥ ८२ ॥

---

७४. -b) दे$_3$ वा (→च).

७७. -b) दे$_1$ प्राप्नोत्य° (→आप्नोत्य°).

८०. -b) दे$_3$ मदा (→मुदा).

८१. -b) दे$_1$ समुदद्धर्त्ते, दे$_2$ सुमुहर्ते (→सुमुहूर्ते°). -c) दे$_1$ प्रदक्षिणा° (→प्रदक्षिण°). -d) दे$_3$ भवि (→भुवि).

८२. दे$_1$ c d Θ. -a) दे$_3$ [द] त्वा (→दत्वा). -b) दे$_3$ °नदाय (→°नघाय).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इह लोके सुखी भूत्वा प्रेत्य निर्वाणमृच्छति ।
यत्र गोपर्वतेशानमुद्दिश्य शिवयोगिने ॥ ८३ ॥

मुष्टिमात्रमपि ब्रह्मन् ददाति स हि मुच्यते ।
तन्मे प्रियतमं स्थानं विद्धि साक्षाद् विमुक्तये ॥ ८४ ॥

श्रीकालहस्तिशैलाख्यं स्थानं सर्वत्र विश्रुतम् ।
सुवर्णमुखरीतीरे किरातैश्च समावृते ॥ ८५ ॥

अस्यां नद्यां पुरा ब्रह्मा स्नात्वा नित्यं दृढव्रतः ।
तपस्तप्त्वा चिरं घोरं जप्त्वा पञ्चाक्षरं मुने ॥ ८६ ॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्ये नराधमाः ।
कलिदोषेण वै सर्वे पापिष्ठाः स्युर्न संशयः ॥ ८७ ॥

वेदमार्गपरिभ्रष्टा भविष्यन्ति कलौ युगे ।
अल्पायुष्या भविष्यन्ति दरिद्राश्च न संशयः ॥ ८८ ॥

आधिव्याध्यस्त्रशस्त्रादिपीडिताश्च पुनः पुनः ।
अनावृष्टिर्महातीव्रा भविष्यति न संशयः ॥ ८९ ॥

अतः केनैव मार्गेण सकलं सुस्थिरं भवेत् ।
इति संचिन्त्य सर्वात्मा पूजयामास शंकरम् ॥ ९० ॥

प्रसन्नो देवदेवोऽहमभवं पूजया तदा ।
पुनश्च पूजयामास वदोपायं हरेति सः ॥ ९१ ॥

---

८३. दे$_1$ a b Θ.

८४. b) दे$_2$ सविसुच्ह्यते, दे$_3$ स विमुख्यते (→स हि मुच्यते).

८५. दे$_1$ a b Θ.

८७. -c) दे$_{2.3}$ * * (→सर्वे). -d) दे$_3$ पापिष्ठा (→पापिष्ठाः).

८८. -d) दे$_1$ दरिद्राः स्युः (→दरिद्राश्च).

८९. -c) दे$_1$ °शास्त्रादि° (→°शस्त्रादि°).

९०. -b) दे$_{2.3}$ सुस्थितं (→सुस्थिरं).

९१. -d) दे$_2$ ववोपायं हरेतिः [सः]

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मयाप्युपायो ब्रह्मर्षे प्रोक्तः सर्वार्थसाधकः ।
आदित्ये चापसंयुक्ते चन्द्रे चार्केण संयुते ॥ ९२ ॥

अस्यां नद्यां मया सार्धं स्नात्वा मां सेव्य सादरम् ।
मामुद्दिश्य यथाशक्ति वस्त्रं च स्वर्णमेव च ॥ ९३ ॥

तिलं वा गां महीं वापि कन्यकामथवापि वा ।
अन्नपानमथान्यद् वा प्राणिनां यत् सुखावहम् ॥ ९४ ॥

दत्त्वा तद् ब्रह्मविद्भ्यस्ते तदनुज्ञामवाप्य च ।
अस्मिन् प्रदक्षिणीकृत्य स्थाने मामम्बिकापतिम् ॥ ९५ ॥

दिनमेकं कुरु ब्रह्मन् प्रतिमासमतन्द्रितः ।
वत्सरान्ते महादेवः स्थानेऽस्मिन् श्रद्धया सह ॥ ९६ ॥

समाराध्य प्रसादेन सर्वं साधय वाञ्छितम् ।
इत्युक्तो मुनिशार्दूल मया ब्रह्मा चतुर्मुखः ॥ ९७ ॥

सुवर्णमुखरीं गत्या देवदेवेन सादरम् ।
एवं व्रतं करिष्येऽहमिति संकल्प्य बुद्धिमान् ॥ ९८ ॥

स्नात्वा संपूज्य देवेशं दत्त्वा वेदविदे धनम् ।
ब्राह्मणेभ्यश्च मेधावी तदनुज्ञामवाप्य च ॥ ९९ ॥

प्रदक्षिणत्रयं कृत्वा ब्रह्मन् ब्रह्मविदां वर ।
स्तोत्रैः स्तुत्वा मुने भक्त्या प्रणिपत्य पुनः पुनः ॥ १०० ॥

---

९३. -b) दे$_3$ स्यात्वा (→स्नात्वा). -d) दे$_3$ वस्त्रं वै (→वस्त्रं च); दे$_{1-3}$ वा (→च);

९४. -a) दे$_3$ तिस्नि (→तिलं); -d) दे$_{2.3}$ प्राणिनं (→प्राणिनां).

९५. -a) दे$_3$ त्वादै (→दत्त्वा). -b) दे$_2$ तदवज्ञामावाप्य च.

९६. -b) दे$_2$ प्रति * * (→प्रतिमासं). -c) दे$_{1-3}$ महादेव (→महादेवः). -d) दे$_3$ सहा (→सह).

९९. -a) दे$_{2.3}$ तं पूज्य (→संपूज्य).. -b) दे$_3$ ब्रह्मविदे (→वेदविदे).

१००. -c) दे$_{2.3}$ स्तोत्रै [:] (→स्तोत्रैः).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रतिमासं चरित्वैतद् व्रतमेवं समाहितः ।
वत्सरान्ते समाराध्य स्थानेऽस्मिन् परमेश्वरम् ॥ १०१ ॥

दृष्ट्वा भवानीसहितं त्रिनेत्रं चन्द्रशेखरम् ।
नीलग्रीवं विरूपाक्षं विश्वलोकैकनायकम् ॥ १०२ ॥

प्रार्थयामास धर्मात्मा लोकानां हितमुत्तमम् ।
देवोऽपि करुणाविष्टो वीक्ष्य साक्षाच्चतुर्मुखम् ॥ १०३ ॥

तथा भविष्यति ब्रह्मन् लोकानां हितमुत्तमम् ।
इत्युक्त्वा देवदेवोऽपि तत्रैवान्तर्धीयते ॥ १०४ ॥

अस्यां नद्याममावास्यां स्नात्वा भक्तिसमन्वितः ।
श्रीकालहस्तिनाथाय त्रिःकृत्वाऽनु प्रदक्षिणाम् ॥ १०५ ॥

दृष्ट्वा प्रणम्य यत्किञ्चिद् ददाति स विमुच्यते ।
विषुवायनकालेषु व्यतीपातेऽथ वा नरः ॥ १०६ ॥

अस्यां स्नात्वा महादेवं प्रणम्य मुनिपुंगव ।
दृष्ट्वा दत्त्वा यथाशक्ति महापापात्प्रमुच्यते ॥ १०७ ॥

ब्राह्मे मुहूर्ते चोत्थाय पादौ प्रक्षाल्य सादरम् ।
श्रीकालहस्तिनाथं मां त्रिःकृत्वाऽनुप्रदक्षिणम् ॥ १०८ ॥

दृष्ट्वा प्रणम्य मेधावी सर्वपापात्प्रमुच्यते ।
अत्र दृष्ट्वा महादेवं दिनमेकमुपोषितः ॥ १०९ ॥

---

१०२. -d) दे$_2$ °नाथकं (→°नायकं).

१०३. -c) दे$_2$ करुणं° (→करुणा°).

१०४. दे$_1$ पुस्तके 104 c d,–105 a b Θ.

१०६. -a) दे$_1$ देवं तु (→प्रणम्य). -d) दे$_2$ च (→[अ] थ); दे$_3$ व्यतीयात्प्रमुच्यते च वा नरः (?)

१०८. -a) दे$_{2.3}$ उत्थाय (→चोत्थाय). -d) दे$_2$ प्रदक्षिणां (→प्रदक्षिणं).

१०९. -b) दे$_1$ सर्वपापैः (→सर्वपापात्).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्राप्नोति नरकं घोरं सत्यं सत्यं महामुने ।
अन्यानपि महास्थानान्यद्भुतानि महामुने ॥ ११० ॥

सन्ति चैतेषु सर्वेषु स्थानमेतद् विशिष्यते ।
अत्र भक्तिमतां नृणां मुक्तिः साक्षात् करे स्थिता ॥ १११ ॥

बहवो मां समाराध्य स्थानेऽस्मिन् मुनिसत्तम ।
संसारबन्धनात् मुक्ता अनायासेन सुव्रत ॥ ११२ ॥

क्षेत्रपालोऽपि मां पूज्य स्थानेऽस्मिन् मुनिपुंगव ।
सर्वलोकाधिपत्यं च प्राप्तवानचिरेण तु ॥ ११३ ॥

आदित्योऽस्मिन् महास्थाने पूज्य मामादरेण तु ।
मत्प्रसादान्महातेजा अभवन्मुनिसत्तम ॥ ११४ ॥

चन्द्रः संपूज्य मां प्राप्तः शैत्यं सर्वजनप्रियम् ।
किमत्र बहुनोक्तेन श्रूयतां मुनिपुंगव ॥ ११५ ॥

सुवर्णमुखरीस्नानं कृत्वा ध्यानपुरःसरम् ।
श्रीकालहस्तिनाथं मां त्रिः कृत्वा तु प्रदक्षिणम् ॥ ११६ ॥

प्रणम्य सर्वमाप्नोति नात्र कार्या विचारणा ।
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात् ॥ ११७ ॥

पुत्रार्थी लभते पुत्रं कन्यार्थी कन्यकामपि ।
आरोग्यकामस्त्वारोग्यं विजयार्थी जयं लभेत् ॥ ११८ ॥

---

११०. -a) दे$_{1-3}$ नापप्रोति (→प्राप्नोति). -c) दे$_2$ आन्यान्यपिपि, दे$_3$ अन्यान्यपि (→अन्यानपि).
१११. -a) दे$_1$ चैलेषु (→चैतेषु). -d) दे$_2$ साक्षाक्षात् (→साक्षात्).
११३. -b) दे$_1$ °सत्तम (→°पुंगव).
११४. -a) दे$_1$ महस्थाने (→महास्थाने). -c) दे$_1$ °प्रभावान्, दे$_3$ °प्रज्ञादान् (→°प्रसादान्).
११५. -d) दे$_{2.3}$ श्रृणुष्व (→श्रूयतां).
११६. -b) दे$_2$ पुरुःसरम् (→पुरःसरम्).
११७. -b) दे$_2$ कार्य (→कार्या). -c) दे$_2$ विद्याक्षा (→विद्यार्थी).
११८. -a) दे$_2$ पुत्रां (→पुत्रं). -b) दे$_1$ इयात् (→अपि). -d) दे$_2$ विजयाया (→विजयार्थी).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वश्यार्थी वश्यमाप्नोति धनार्थी धनमाप्नुयात् ।
ब्रह्महा मद्यपः स्तेयी तथान्ये पापकारिणः ॥ ११९ ॥

सर्वे पापात् प्रमुच्यन्ते नित्यमस्यैव सेवया ।
स्थानमेतत् प्रियं विद्धि मम देव्याश्च सुव्रत ।
तस्मात् त्वं च महाभाग मामत्राराधयादरात् ॥ १२० ॥

इत्युपपुराणे वासिष्ठलिङ्गे तृतीयोऽध्यायः ॥ ३ ॥

---

११९. -c) दे$_1$ ब्रह्महा मद्यपायी च.

१२०. -b) दे$_3$ अस्यै [व] (→अस्यैव). दे$_3$ मा [माम] त्राराधयादरात्.

पुष्पिका– दे$_{2.3}$ °लैङ्गे (→°लिङ्गे)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

४

ईश्वर उवाच*

श्रुत्या वेदविदां श्रेष्ठ विहितो धर्म उच्यते ।
निषिद्धोऽधर्म इत्युक्तस्तव ज्ञानव्रतात्मनः ॥ १ ॥

प्रमाणं वेद एव स्याद् धर्मेऽधर्मे च मय्यपि ।
वर्णाश्रमाचारवता पूज्यो देवो न चान्यथा ॥ २ ॥

प्रथमायां द्विजः स्नात्वा वाङ्यतो भक्तिमान् नरः ।
उपलिप्य समां भूमिं गोमयेन स्वयं मुदा ॥ ३ ॥

आसनं परिकल्प्यास्मिन्नावाह्य वृषभं ततः ।
लिङ्गमूर्तिं महादेवं स्नाप्य पुण्योदकेन च ॥ ४ ॥

पञ्चाक्षरेण मन्त्रेण प्रतिष्ठाप्य वृषासने ।
पुष्पैर्नानाविधैर्ब्रह्मंस्तण्डुलैरर्चयेत् ततः ॥ ५ ॥

धूपं दत्त्वा पुनर्दीपमन्नं पानं च बुद्धिमान् ।
प्रदक्षिणं त्रयं कृत्वा स्तोत्रैः स्तुत्वा प्रणम्य च ॥ ६ ॥

दद्यात् पूजाफलं तस्मै न फलं काङ्क्षयेद् बुधः ।
ब्रह्महत्याकृतं पापं छित्वा स्वर्गमवाप्नुयात् ॥ ७ ॥

४

* दे$_{2.3}$ श्री ईश्वर उवाच ।

२. -b) दे$_2$ [अ] धर्म (→[अ] धर्मे). -c) दे$_3$ °वतां (→°वता).

३. -a) दे$_3$ प्रथमाया (→प्रथमायां).

४. -b) दे$_3$ °नवाह्य (→°न्नावाह्य). –c) दे$_2$ लिंगमूर्ति (→लिङ्गमूर्तिं).

६. -c) दे$_{2.3}$ प्रदक्षिण (→ प्रदक्षिणं). -d) दे$_3$ स्तोत्र– (→स्तोत्रैः).

७. -b) दे$_3$ फल (→ फलं). -d) दे$_3$ छित्वां (→ छित्वा).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

द्वितीयायां तथा स्नात्वा ब्रह्मचर्यपरायणः ।
पञ्चाक्षरेण मन्त्रेण स्थाप्य लिङ्गं समाहितः ॥ ८ ॥

तिलैश्च तण्डुलैः पुष्पैः पूज्य पूर्वोक्तमन्त्रतः ।
हविर्निवेद्य मेधावी दिनमेकमुपोषितः ॥ ९ ॥

ब्राह्मणान् भोजयित्वा तु स्वर्णस्तेयात्प्रमुच्यते ।
तृतीयायां हरं भक्त्या पूज्य पूर्वोक्तभक्तितः ॥ १० ॥

यथाशक्ति धनं हत्त्वा सुरापानात् प्रमुच्यते ।
चतुर्थ्यां शंकरं भक्त्या पूज्य पूर्वोक्तमार्गतः ॥ ११ ॥

यथाशक्ति धनं दद्यात् ब्राह्मणाय समाहितः ।
गुरुतल्पगदोषोऽपि मुच्यते नात्र संशयः ॥ १२ ॥

पञ्चम्यां तु तिलेनैव पूज्य पूर्वोक्तमार्गतः ।
महापातकिसंसर्गदोषान्मुक्तो भवेन्नरः ॥ १३ ॥

षष्ठ्यां घृतेन संस्नाप्य चन्दनेन जलेन च ।
उपपातकदोषेण मुच्यते नात्र संशयः ॥ १४ ॥

सप्तम्यां शुद्धतोयेन स्नात्वा पुष्पैः समर्चयेत् ।
क्षुद्रपापात् प्रमुच्येत नात्र कार्या विचारणा ॥ १५ ॥

---

८. -a) दे$_3$ द्वितीयायं (→द्वितीयायां).

९. -c) दे$_3$ °नि [वे] द्य (→° निवेद्य).

१०. -d) दे$_3$ °मार्गतः (→°भक्तितः).

११. -c) दे$_3$ चतुर्थ्यं (→ चतुर्थ्यां); दे$_2$ शंकर (शंकरं). -d) दे$_2$ पूज्यः, दे$_3$ पूज्या (→पूज्य).

१२. -a) दे$_{2.3}$ दत्त्वा (→दद्यात्). -b) दे$_2$ ब्राह्मणय, दे$_3$ ब्रह्मणाय (→ब्राह्मणाय). -c) दे$_1$ गुरुतुल्य° (→गुरुतल्प°); दे$_{2.3}$ °दोषेण (→°दोषोऽपि). -d) दे$_3$ मुच्यते (→मुच्यते).

१५. -b)दे$_{2.3}$ स्नाप्य (→स्नात्वा). -c); दे 3 प्रमुच्यंते (प्रमुच्येत्). -d) दे$_2$ कार्य (→कार्या).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अष्टम्यां पञ्चगव्येन स्नाप्य तोयेन शंकरम् ।
सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात् ॥ १६ ॥

नवम्यां मधुना स्नाप्य शुद्धतोयेन शंकरम् ।
कुलैकविंशमुत्तार्य संगच्छेत् परमं पदम् ॥ १७ ॥

दशम्यां पयसा स्नाप्य कुशपुष्पोदकेन च ।
सर्वपापविनिर्मुक्तः सम्यग्ज्ञानमवाप्नुयात् ॥ १८ ॥

एकादश्यां शुचिः स्नात्वा भोजनेन विवर्जितः ।
शिवं शुद्धोदकैः स्नाप्य शिवलोके महीयते ॥ १९ ॥

द्वादश्यामभिषिच्येशं गुग्गुलं धूपयेत् ततः ।
ब्रह्मलोकमवाप्नोति नात्र कार्या विचारणा ॥ २० ॥

त्रयोदश्यां शिवं पूज्य शंकरं चन्दनैः सह ।
विलिप्य सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ २१ ॥

चतुर्दश्यां महादेवं स्नाप्य पूर्वोक्तमार्गतः ।
तिलतण्डुलपुष्पाद्यैः पूज्य विप्रांस्तु भोजयेत् ॥ २२ ॥

अभीष्टं सकलं लब्ध्वा शिवलोके महीयते ।
पञ्चदश्यां शुचिः स्नात्वा तोयेनैवाभिषेचयेत् ॥ २३ ॥

---

१६. -c) दे$_3$ °विनिर्मुक्ता: (→°विनिर्मुक्त:).

१७. -a) दे$_2$ °स्नाप्ये, दे$_3$ - प्यस्य (→स्नाप्य). -c)दे$_{2.3}$ उत्तीर्य (→उत्तार्य). -d)दे$_2$ समछेत् (→संगच्छेत्); दे$_1$ पद (→पदं).

१९. -a)दे$_2$ शुचि (→सुचि:). -d) दे$_3$° सौके (→°लोके).

२०. —b) दे$_2$ धूपये (→धूपयेत्).

२१. —d) दे$_{1-3}$ शंकर: (→संशय:)

२२. —d) दे$_2$ पूज्य विप्रांश्च (दे$_3$ विप्राश्च) भोजयत्.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पुष्पैर्नानाविधैः पूज्य ब्राह्मणं भोजयेन्मुदा ।
ऐश्वर्यं सकलं लब्ध्वा प्रेत्य स्वर्गे महीयते ॥ २४ ॥

अश्विन्यां देवमाराध्य ब्राह्मणं भोजयेन्नरः ।
अश्विलोकमवाप्नोति नात्र कार्या विचारणा ॥ २५ ॥

भरण्यां रुद्रमभ्यर्च्य ब्राह्मणान् भोजयेन्मुदा ।
यमलोकमवाप्नोति यावदाचन्द्रतारकम् ॥ २६ ॥

कृत्तिकायां शिवं पूज्य ब्राह्मणानेव भोजयेत् ।
अग्निलोकमवाप्नोति नात्र कार्या विचारणा ॥ २७ ॥

रोहिण्यां शंकरं पूज्य ब्राह्मणायान्नदो नरः ।
सर्वपापविनिर्मुक्तो ब्रह्मलोकमवाप्नुयात् ॥ २८ ॥

मृगशीर्षे महादेवं पूज्यान्नं वस्त्रमेव च ।
ब्राह्मणायादराद् दत्त्वा चन्द्रलोके महीयते ॥ २९ ॥

आर्द्रायां शंकरं पूज्य दद्याद् ब्रह्मविदे धनम् ।
सम्यग्ज्ञानमवाप्याशु ब्रह्म साक्षात् प्रपद्यते ॥ ३० ॥

आदित्ये योऽर्चयेदीशं ब्राह्मणांश्चैव भोजयेत् ।
अदितेर्लोकमाप्नोति स पुनर्ब्रह्म गच्छति ॥ ३१ ॥

---

२४. —b) दे2 ब्राह्मणान् भोजयन्मुदा –c) दे2 ऐश्वर्य–, दे3 एश्वर्य – (→ ऐश्वर्यं); दे2.3 अखिलं (→ सकलं).

२५. —a) दे3 आ [रा]ध्य (→[आ] राध्य). -b) दे2 ब्राह्मणान् (→ब्राह्मणं). —c) दे2 अश्वितोलोकमाप्नोति, दे3 अश्विनोलोकम ** ति. —d) दे2.3 कार्य (→कार्या).

२६. —a) दे3 °अभ्यर्च्या (→°अभ्यर्च्य) -b) दे3 ब्राह्मणानु (→ब्राह्मणान्)

२८. —a) दे3 रोहिण्या (→रोहिण्यां)

२९. —a) दे1 मृगशिरसि, (→मृगशीर्षे) .—b) दे1 वा (→च) . —c) दे1 °दूराद् (→°दराद्).

३१. —b) दे3 ब्राह्मणांनांव (→ब्राह्मणाश्चैव) . —c) दे1 आदित्य (→अदितेर्)..—d) दे2 ग [च्छ] ति (→गच्छति).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पुष्यैः पूज्य महादेवं विप्रायान्नं ददाति यः ।
बृहस्पतिसमो बुद्ध्या भवेत् तत्र न संशयः ॥ ३२ ॥

आश्लेषर्क्ष्ये महादेवं पूज्य तोयं ददाति यः ।
नागलोकमवाप्नोति स पुनस्तत्र मोदते ॥ ३३ ॥

माघे देवं समाराध्य तिलानामाढकं नरः ।
शिवं वा द्रोणयुग्मं वा ब्राह्मणाय ददाति यः ॥ ३४ ॥

सर्वपापविनिर्मुक्तः पितृलोकमवाप्नुयात् ।
भगनक्षत्रके भक्त्या पूज्य देवं त्रियम्बकम् ॥ ३५ ॥

यथाशक्तिप्रदानेन भगलोकमवाप्नुयात् ।
उत्तरे शिवमभ्यर्च्य गां ददाति द्विजातये ॥ ३६ ॥

सूर्यलोकमवाप्नोति नात्र कार्या विचारणा ।
हस्ते पूज्य महादेवं दद्याद् ब्रह्मविदे धनम् ॥ ३७ ॥

सूर्यलोकमवाप्नोति सुखं चाक्षयमश्नुते ।
चित्रायामीश्वरं पूज्य भक्त्या दत्त्वाङ्गुलीयकम् ॥ ३८ ॥

त्वष्टारं प्राप्यते नैव सह रुद्रं स गच्छति ।
स्वातौ साम्वं समभ्यर्च्य ब्राह्मणानपि भोजयेत् ॥ ३९ ॥

---

३२. —a) दे2.3 पुष्पै (→पुष्यैः) .—b) दे3 प्रियान्न (→विप्रायान्नं).

३३. —d) दे2.3 पुमांस्तत्र (→पुनस्तत्र).

३४. —a) दे2.3 मघे (→माघे) —d) दे2 य (→यः).

३६. —b) दे3 अपाप्नुयन् (→अवाप्नुयात्). —c) दे3 उत्तरो (→उत्तरे)

३७. —a) दे1 अर्यण्णोलोकमाप्नोति.

३९. —a) दे3 त्वष्टातं (→त्वष्टारं).—c) दे1 स्वातौ सोमं, दे3 सरवातौ संवं (→स्वातौ साम्वं). —d) दे3 ब्राह्मणानीय (→ब्राह्मणानपि).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वायुलोकमवाप्नोति सुखं चानन्त्यमश्नुते ।
विशाखे पूज्य देवेशं दत्त्वा ब्रह्मविदे धनम् ॥ ४० ॥

इन्द्राग्नित्यमवाप्नोति शिवं प्राप्नोत्यसंशयम् ।
अनुराधादिने साक्षादभिपूज्य वृषध्वजम् ॥ ४१ ॥

दत्त्वा ब्रह्मविदे वित्तं मैत्रलोकं समाप्नुयात् ।
ज्येष्ठायां शिवमाराध्य दत्त्वा माषं द्विजातये ॥ ४२ ॥

इन्द्रलोकमवाप्नोति नात्र कार्या विचारणा ।
मूले महेश्वरं पूज्य ब्रह्मणाय ददाति यः ॥ ४३ ॥

अन्नं स नैर्ऋतं लोकं गत्वान्ते रुद्रमाप्नुयात् ।
पूर्वाषाढे महादेवं पूज्य पुष्पं ददाति यः ॥ ४४ ॥

स याति वारुणं लोकं नात्र सन्देहकारणम् ।
उत्तराषाढनक्षत्रे पूज्य देवं त्रियम्बकम् ॥ ४५ ॥

दत्त्वा तण्डुलमन्यद् वा ब्राह्मणायानसूयवे ।
ब्रह्मलोकमवाप्नोति विश्वेदेवत्वमेव च ॥ ४६ ॥

श्रवणे रुद्रमभ्यर्च्य दत्त्वा विप्राय भोजनम् ।
विष्णुलोकमवाप्नोति सुखं चाक्षयमश्नुते ॥ ४७ ॥

---

४०. —c) दे2.3 विशाखै (→विशाखे). —d) दे1 धन (→धनम्).

४१. दे1 पुस्तके 41-42 श्लोकस्य abc Θ.—b) दे2 [अ] संशयः, दे3 अंशयः (→[अ] संसयम्).

४२. —c) दे3 ज्येष्ठाया (→ज्येष्ठायां). –d) दे1 भाषान् (→माषं).

४३. —b) दे2.3 कार्य (→कार्या)

४४. —a) दे2 नैत्रतं (→नैर्ऋतं); दे1 लोक (→लोकं).

४५. —a) दे2 लोक (→लोकं).

४६. —b) दे1 व्राह्मणाय निवेदेयेत्.–d) दे3 विश्वदेव °(→विश्वेदेव°); दे1 वा (→च)

४७. —c) दे2 °लोकाम् (→°लोकम्).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रविष्ठायां समाराध्य नीलग्रीवं त्रियम्बकम् ।
वसूनां लोकमाप्नोति दत्त्वा विप्रमुखे धनम् ॥ ४८ ॥

रुद्रं शतभिषे पूज्य ब्राह्मणायानसूयवे ।
दत्त्वा वस्त्रं हिरण्यं वा वारुणं लोकमाप्नुयात् ॥ ४९ ॥

पूर्वाभाद्रपदे पूज्य पुराणं परमेश्वरम् ।
एकपादं हरं याति नात्र कार्या विचारणा ॥ ५० ॥

यश्च पूज्योन्तरा भाद्रे शिवं परं कारणम् ।
ब्राह्मणाय विनीताय ददाति धनमुत्तमम् ॥ ५१ ॥

अहिर्बुध्न्यमवाप्नोति नास्ति संशयकारणम् ।
रेवत्यामभिपूज्येशं दत्त्वा विप्राय भोजनम् ॥ ५२ ॥

सूर्यलोकमवाप्नोति सत्यं सत्यं महामुने ।
अर्कवारे महादेवं त्रिः कृत्वा तु प्रदक्षिणम् ॥ ५३ ॥

प्रणम्य दण्डवद् भूमौ भक्त्या परमया सह ।
स्नात्वा स्रक्चन्दनाद्यैस्तु स्वशरीरमलंकृतम् ॥ ५४ ॥

भोग्यं ददाति या वेश्या यथेष्टं शिवयोगिने ।
तस्याः पुण्यफलं ब्रह्मन् श्रृणु वेदविदां वर ॥ ५५ ॥

ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकैः ।
मुच्यते नात्र संदेहो मद्भक्तस्याभिपूजनात् ॥ ५६ ॥

---

४८. —a) दे$_{2.3}$ धनिष्ठायां (→श्रविष्ठायां) .-d) दे$_{2.3}$ °सुखे (→°मुखे).

५०. —c) दे$_{2.3}$ °पाद (→°पादं)

५१. —b)दे$_{1\text{-}3}$ परम (→ परं).

५२. —a) दे$_2$ आहिरं (→ अहिर्°). —b) दे1 संदेह, दे3 संश [यः] (→ संशयः).
—c) दे$_3$ रेवत्यं (→ रेवत्यां).

५४. —d)दे$_3$ [स्व] शरीरमलंकृत.

५६. —d) दे$_2$ मुच्यते नात्वतंदेहो.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इह लोके मुने पुंसां वस्त्रमाभवति ध्रुवम् ।
आयुरारोग्यमैश्वर्यमपि प्राप्नोत्यनुत्तमम् ॥ ५७ ॥

प्रेत्य सूर्यप्रतीकाशैर्विमानैर्बहुभिः सह ।
पार्वतीलोकमाप्नोति सुखं चाक्षयमश्नुते ॥ ५८ ॥

अर्कवारे तु विद्वांसं धनं दत्त्वानु भोजयेत् ।
वेश्यामलंकृतां ब्रह्मन् तस्य पुण्यफलं श्रृणु ॥ ५९ ॥

सर्वपापविनिर्मुक्तः सर्वैश्वर्यमवाप्नुयात् ।
सोमवारे महादेवं दृष्ट्वा भूमौ प्रणम्य च ॥ ६० ॥

वस्त्रं वा धनमन्यद् वा ददाति शिवयोगिने ।
मुच्यते शंकरार्थं यः पापैः सर्वैर्न संशयः ॥ ६१ ॥

भौमवारे महादेवं प्रणम्य शिवयोगिने ।
ददाति धनमन्यद्वा स युद्धे जयमाप्नुयात् ॥ ६२ ॥

बुधवारे विरुपाक्षं प्रणम्य भूवि दंडवत् ।
अभ्यंङ्गं योगिनः आरोग्यं शीघ्रमाप्नुयात् ॥ ६३ ॥

---

५७. —a) दे$_2$ लोकै (→लोके); -b) दे$_1$ वल्लभा [ल्ल], दे$_2$ व -भा-(→वस्त्रमा-)

५९. —b) दे$_3$ दत्वा तु (→दत्त्वानु). c) दे$_3$ वश्याम्° (→वेश्याम्°)

६०. —a) दे$_3$ सर्वपापा विनिर्मुक्ताः

६१. —c) दे$_{2,3}$ सः (→यः)

६२. —a) दे$_1$ महादेव (→महादेवं)

दे हस्तेलेखे ६२-६५ श्लोकानां पाठोऽधोनिर्दिष्ट रूपेण वर्तते–

भौमवारे मंहादेवं प्रणम्य शिव योगिने ।
ददाति धन मन्यद्वा स युद्धे जय माप्नुयात् ॥ ६२ ॥
बुधवारे विरुपाक्षं प्रणभ्य परमेश्वरं ।
ज्ञानिनं भोजयित्वा तु शिव ज्ञान मवाप्नुयात् ॥ ६३ ॥
गुरुवारे शिवं दृष्ट्वा प्रणम्य भूवि दंडवत् ।
शिवयोगि करे दत्वा यत्किंचिद्धन मुत्तमं ॥ ६४ ॥
शुक्रवारे मुने दृष्ट्वा द्धणम्यवृष वाहनं ।
अभ्यंगं योगिनः कुर्वन्नारोग्यं शामवाप्नुयात् ॥ ६५ ॥

६३. —b) दे$_3$ प्रणम्य परमेश्वरं. –d) दे$_3$ आरोग्यंशा मप्नुयातत्दे.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गुरुवारे शिवं दृष्ट्वा प्रणम्य परमेश्वरम् ।
ज्ञानिनं भोजयित्वा तु शिवज्ञानमवाप्नुयात् ॥ ६४ ॥

शुक्रवारे मुने दृष्ट्वा प्रणम्य वृषवाहनं ।
शिवयोगिकरे दत्वा यत्किंचिद्धनमुत्तमम् ॥ ६५ ॥

वन्ध्यापुत्रमवाप्नोति नरः प्राप्नोति काङ्क्षितम् ।
मन्दवारे महादेवं नमस्कृत्य तु योगिनम् ॥ ६६ ॥

ददाति धनमत्यल्पमपि यो मुनिसत्तम ।
स राज्ञां वल्लभो भूत्वा धनं चाक्षयमाप्नुयात् ॥ ६७ ॥

व्यतीपाते धनं चान्नं तिलं च तण्डुलं तु वा ।
नमस्कृत्य महादेवं योगिने यः ददाति सः ॥ ६८ ॥

सर्वपापविनिर्मुक्तः स्वर्गं मोक्षं च विन्दति ।
बहुनोक्तेन किं ब्रह्मन् महादेवस्य पूजनात् ॥ ६९ ॥

निकृष्टोऽपि विमुच्येत स्वसंसारमहोदधेः ।
यः शिवं पूज्यते नित्यं लिङ्गे भक्त्या मुने तु सः ।
अदृष्ट्वा नरकं घोरं शिवं साक्षादवाप्नुयात् ॥ ७० ॥

ज्ञानानि यज्ञाश्च महातपांसि
सन्यासवृत्तिश्चं जितेन्द्रियत्वम् ।
सर्वे न तुल्यं भवतीश्वरस्य
लिङ्गस्य नित्यार्चनयेति विद्धि ॥ ७१ ॥

इत्युपपुराणे वासिष्ठलिङ्गे चतुर्थोऽध्यायः ॥ ४ ॥

---

६४. —b) दे$_3$ प्रणम्य भुवि दंडवत्
६६. —b) दे$_{2.3}$ चाप्नोति (→प्राप्नोति). –d) दे$_{2.3}$ योगिने (→योगिनम्)
६८. —b) दे$_{1.2}$ चा, दे$_3$ वां (→च). –d) दे$_{1.3}$ यो (→यः)
६९. —a) दे$_3$ सर्वपापा विनिनिमुक्तः.
७०. —a) दे$_1$ निष्कृष्टोपि (→निकृष्टोऽपि); दे$_3$ प्रच्येत (→विमुच्येत). –c) दे$_1$ पूजयेन् (→पूज्यते). –d) दे$_3$ [तु] (→तु) —e) दे$_3$ घोर (→घोरं).
७१. –b) दे$_3$ [सं] न्यास° (→सन्यास°). –c) दे$_2$ सर्वं (→सर्वे)

पुष्पिका– दे2.3 °लैङ्गे (→°लिङ्गे)

●

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

५

ईश्वर उवाच*

भस्म विद्धि परं ब्रह्म [१] सत्यबोधसुखाह्वयम् ।
भर्त्सनात् सर्वपापानां भूतानां च महामुने ॥ १ ॥

भस्मेति कीर्तितं रक्षा रोगाणां वापि रक्षणात् ।
भयेभ्यो रक्षणाच्चैव भासनात् भसितं तथा ॥ २ ॥

क्षारयत्यखिलान् दोषांस्तस्तात् क्षारमिति स्मृतम् ।
तत्पुनर्द्विविधं विद्धि मुख्यं गौणं च सुव्रत ॥ ३ ॥

मुख्यं प्रोक्तं परं ब्रह्म गौणमाग्नेयमुच्यते ।
भस्म तद्वेदनाल्लभ्यं मुख्यं तदपरं बुध ॥ ४ ॥

आग्नेयं गौणमज्ञानध्वंसकं ज्ञानसाधनम् ।
गौणं नानाविधं विद्धि ब्रह्मन् ब्रह्मविदां वर ॥ ५ ॥

अग्निहोत्राग्निजं तद्वद् विरजाहोमजं मुने ।
औपासनसमुद्भूतं समिदग्निसमुद्भवम् ॥ ६ ॥

---

* दे2.3 श्री ईश्वर उवाच.

१. —a) दे1 भस्मा (→भस्म); दे1 ब्रह्मन् (→ब्रह्म) . -b) दे1 °लोक (→°बोध°).

२. —b) दे1 चात्र, दे2 चापि (→वापि).

३. —b) दे1 ततः (→तस्मात्) .-c) दे3 शेक्तं (→विद्धि); दे2 तत्पुनर्द्विवि * प्रोक्तं .-d) दे3 गोणं (→गौणं); दे1 तथैव च (→च सुव्रत).

४. —a) दे3 ब्र * (→ब्रह्म) . -d) दे1 बुधः (→बुध).

५. —b) दे1 °साधन (→°साधनम्).

६. —a) दे3 °ग्निजां (→°ग्निजं) . -d) दे1 °समुद्भवः (→°समुद्भवम्).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पचनाग्निसमुद्भूतं दावानलसमुद्भवम् ।
त्रैवर्णिकानां सर्वेषामग्निहोत्रसमुद्भवम् ॥ ७ ॥

विरजानलजं चैव धार्यं भस्म महामुने ।
औपासनसमुत्पन्नं गृहस्थानां विशेषतः ॥ ८ ॥

समिदग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिणाम् ।
शूद्राणां श्रोत्रियागारे पचनाग्निसमुद्भवम् ॥ ९ ॥

अन्येषामपि सर्वेषां धार्यं दावानलोद्भवम् ।
'अग्नि' इत्यादिभिर्मन्त्रैः षड्भिराथर्वणैस्तथा ॥ १० ॥

जाबालैः सप्तभिर्वापि धार्यं तद्भस्म सुव्रत ।
उद्धूलनं त्रिपुण्ड्रं च द्विविधं धारणं स्मृतम् ॥ ११ ॥

अग्निहोत्री द्विजो भस्म गृहीत्वा तन्महामुने ।
मुख्यं भस्मेति संचिन्त्य तथा व्योमादिकं जगत् ॥ १२ ॥

दग्धपाशात्मकस्यास्य जगतश्चावगुण्ठनम् ।
करोति भस्मना तेन मुख्येनेति स्मरन्नरः ॥ १३ ॥

---

७. दे$_3$. cd ⊖ (दृ. स.). —a) दे$_1$ पवनाग्नि° (→पचनाग्नि°); दे$_3$ °समुभूतं (→°समुद्भूतं) .-b) दे$_2$ °समुद्भव (→°समुद्भवम्).

९. —a) दे$_3$ समिदाग्नी° (→समिदग्नि°). –b) दे$_{2.3}$ °चारिणा (→°चारिणाम्). –c) दे$_1$ °गौरे (→°गारे). –d) दे$_1$ पवनाग्नि° (→पचनाग्नि°).

१०. —c) दे$_2$ अग्निः (→अग्नि). –d) दे$_3$ षड्भिरार्थवं° (→षड्भिराथर्व°)

११. —a) दे$_{1.2}$ समभिर् (→सप्तभिर्). –c) दे$_3$ उद्धलना त्रपुंड्र च .

१२. —a) दे$_2$ अग्निहोत्रा (दे$_3$ °दिजं) टिजं भस्म. –c) दे$_2$ संचित्या (→संचिन्त्य). –d) दे$_2$ व्योमदिकं (→व्योमादिकं).

१३. —a) दे$_3$ दग्धा° (→दग्ध°). –b) दे$_3$ °गुंठलं (→°गुण्ठनं)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गौणेन भस्मना तेन भावितेन महामुने ।
उद्धूलयेत् स्वकं देहं पापपुञ्जभयापहम् ॥ १४ ॥

त्रियायुषेण मन्त्रेण मेधावीत्यादिना तथा ।
गौणेन भस्मना धार्यं त्रिपुण्ड्रं ब्रह्मचारिणा ॥ १५ ॥

त्रियम्बकेन मन्त्रेण तारेण च तथैव च ।
पञ्चाक्षरेण मन्त्रेण प्रणवेन युतेन च ॥ १६ ॥

ललाटे हृदये चैव दोर्ध्वं द्वे च महामुने ।
त्रिपुण्ड्रं धारयेन्नित्यं गृहस्थश्च वनाश्रमी ॥ १७ ॥

आत्ममन्त्रेण हंसेन प्रणवेन समाहितः ।
त्रिपुण्ड्रं धारयेन्नित्यं संन्यासाश्रमवासिभिः ॥ १८ ॥

नमोन्तेन शिवेनैव शूद्रो शुश्रूषणे रतः ।
उद्धूलनं त्रिपुण्ड्रं च नित्यं भक्त्या समाचरेत् ॥ १९ ॥

अन्येषामपि सर्वेषां विना मन्त्रेण सुव्रत ।
उद्धूलनं त्रिपुण्ड्रं च कर्तव्यं भक्तितो मुदा ॥ २० ॥

एवं भस्म धृतं येन तस्य पुण्यफलं शृणु ।
महापातकसङ्घाश्च तथान्ये चोपपातकाः ॥ २१ ॥

---

१४. —a) दे3 * स्मना (→भस्मना). –b) दे1 भाविते च, दे2 भाविवयुंठतेन (→भावितेन). –c) दे2 उद्धूलये (→उद्धूलयेत्); दे3 दहं (→देहं). –d) दे1 पाश° (→पाप°) दे2.3 °भयावहं (→°भयावहं)

१५. —a) दे1 त्रियायुषेति (→त्रियायुषेणं). -c) दे भस्म वा (→भस्मना).

१६. —b) दे2.3 स तारेण (→तारेण च).

१७. —a) दे2 * लाटे (→ललाटे). –b) दे3 द्वार्द्धं (→दोर्ध्वं).

१८. —d) दे2.3 °माश्रित (दे3 °तः) (→°वासिभिः).

१९. —b) दे1-3 शूद्रः (→शूद्रो).

२१. —a) दे3 येना (→येन).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नश्यन्ति मुनिशार्दूल सत्यं सत्यं न चान्यथा ।
ब्रह्मचर्याश्रमस्थानां स्वाध्यायप्रदमेव च ॥ २२ ॥

गृहस्थानां च सर्वेषां सर्वसंपत्करं मूने ।
वानप्रस्थयतीनां तु स्वात्मज्ञानप्रदायकमु ॥ २३ ॥

शूद्राणां पुण्यदं नित्यमन्येषां पापनाशनम् ।
येन भस्मोक्तमार्गेण न धृतं मुनिपुंगव ॥ २४ ॥

तस्य विद्धि मुने जन्म निष्फलं सूकरो यथा ।
ये भस्मधारणं मुक्त्वा श्रौतस्मार्तानुवर्तिनः ॥ २५ ॥

तैः समाचरितं सर्वं विपरीतफलप्रदम् ।
येषां क्रोधो भवेद् ब्रह्मन् ललाटे भस्मदर्शनात् ॥ २६ ॥

तेषामुत्पत्तिसांकर्यमनुमेयं विपश्चिता ।
ये भस्मधारिणं दृष्ट्वा वाचा निन्दन्ति मानवाः ॥ २७ ॥

तेषां शूद्रेण संभूतिरनुमेया विपश्चिता ।
ये भस्मधारिणं दृष्ट्वां नराः कुर्वन्ति ताडनम् ॥ २८ ॥

तेषां चण्डालतो जन्म ब्रह्मन्नूह्यं विपश्चिता ।
येषां नास्ति मुने श्रद्धा श्रौते भस्मनि सर्वदा ॥ २९ ॥

गर्भाधानादिसंस्कारास्तेषां नास्तीति निश्चयः ।
येषां भस्मनि विद्वेषो वर्तते हृदये सदा ॥ ३० ॥

---

२२. —b) दे2 ** (→सत्यं). –c) दे2.3 °स्थानां (→°स्थानं). –d) दे3 वा (→च).
२३. —b) दे2.3 °प्रदं (→°करं).
२४. —b) दे2.3 °नाशकं (→°नाशनं). –d) दे2.3 °पुंगव (→°पुंगवः).
२५. —b) दे2.3 सौकरं (→सूकरो).
२६. —a) दे2 स * चरितं (→समाचरितं); दे1 पुण्यं (→सर्वं).
२८. —b) दे1 विपश्चिताः (→विपश्चिता).
२९. —d) दे3 श्रेस्ते (→श्रौते).
३०. —a) दे1 °संस्कारः, दे3 °संस्करा (→°संस्काराः). –d) दे3 वर्तर्त हृदय सदा.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संकीर्णा सा भवेद् ब्रह्मंस्तेषां वंशपरम्परा ।
चण्डालो वापि शूद्रो वा भस्मनि प्रीतमानसः ॥ ३१ ॥

सोऽनन्तरे मुने विप्रो भविष्यति न संशयः ।
ये भस्मधारिणं दृष्ट्वा परितृप्ता भवन्ति ते ॥ ३२ ॥

देवासुरमुनीन्द्रैश्च पूज्या नित्यं न संशयः ।
येषां दानं श्रुतिर्यज्ञास्तपश्चान्यानि सुव्रत ॥ ३३ ॥

भस्मधारणपूर्वं स्यात् तेषां तत्सकलं भवेत् ।
भस्मदिग्धशरीराय यो ददाति धनं मुदा ॥ ३४ ॥

तस्य सर्वाणि पापानि विनश्यन्ति न संशयः ।
भस्मसंच्छन्नसर्वाङ्गं दृष्ट्वोत्तिष्ठति यः पुमान् ॥ ३५ ॥

तं दृष्ट्वा देवराजोऽपि दण्डनृत्तं करिष्यति ।
अभक्ष्यभक्षणं तेषां भस्मधारणपूर्वकम् ॥ ३६ ॥

तेषां तद्भक्ष्यमेव स्यान्मुने नात्र विचारणा ।
यः स्नाति भस्मना नित्यं जले स्नात्वा ततः परम् ॥ ३७ ॥

ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ वादरात् ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ ३८ ॥

आग्नेयं भस्मना स्नानं यतीनां तु विशिष्यते ।
आर्द्रस्नानात्परं भस्म आर्द्रे जन्तुवधो ध्रुवः ॥ ३९ ॥

---

३१. –d) $दे_2$ °मानस (→°मानसः).

३५. –a) $दे_2$ तस्थ सर्वाशि (→ तस्य सर्वाणि). –c) $दे_1$ °संस्थेन (→°संच्छन्न-). –d) $दे_2$ ति * * (°तिष्ठति); $दे_3$ यः (→यः).

३६. –b) $दे_2$ °नृतिं (→°नृत्तं). –c) $दे_2$ अभक्ष° (→अभक्ष्य°); $दे_2$ येषां (→तेषां) ; $दे_3$ अ * * भक्षणां येषां.

३८. –a) $दे_3$ * (→वा). –d) $दे_3$ गति (→गतिम्).

३९. –a) $दे_3$ अग्नेयं (→आग्नेयं). –c) $दे_3$ * स्म (→भस्म). –d) $दे_3$ अर्द्धे (→आर्द्रे); $दे_2$ ध्रुव (→ध्रुवः).

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

THE BOARD OF TRUSTEES
OF
THE ALL-INDIA KASHIRAJ TRUST

1. His Highness Maharaja Dr. Vibhuti Narain Singh, M.A., D.Litt. Fort, Ramnagar, Varanasi (*Chairman*).

Trustee nominated by the Govt. of India :–

2. Vacant.

Trustees nominated by the Govt. of Uttar Pradesh :–

3. Sri Krishna Chandra Pant, Ex. Minister, Govt. of India, 7, Tyagraj Marg, New Delhi.

4. Sri Lok Pati Tripathi, Ex. Minister, Govt. of Uttar Pradesh, Aurangabad, Varanasi.

Trustees nominated by His Highness, the Maharaja of Banaras :–

5. Dr. R. N. Dandekar, Bhandarkar Oriental Research Institute, Poona.

6. Pt. Shri Giridhari Lal Mehta, Chairman, Bellis India Ltd., Infar India Ltd., Trustee-Trust Estates of Baldeo Ram Mehta and Saligram Mehta; 4, Clive Row, Calcutta 7000001.

7. Padmabhushan Pt. Baladeva Upadhyaya, M.A. Sahityacharya, Vachaspati; Formerly Director, Sampurnanand Sanskrit University; Ravindrapuri, Varnasi.

Donation made to All-India Kashiraj Trust, Fort, Ramnagar, Varanasi, Will qualify for exemption under Sec. 80G of the Income Tax Act, 1961 in the hands of donors.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Statement of ownership and other particulars about

पुराणम्—PURĀṆA

1.	Place of Publication	...Fort Ramnagar, Varanasi
2.	Periodicity of Publication	...Half-yearly
3.	Printer's Name	...Vinaya Shankar
	Nationality	...Indian
	Address	...Ratna Printing Works, B 21/42 A, Kamachha, Varanasi
4.	Publisher's Name	...Yogendra Narain Thakur General Secretary, All-India Kashiraj Trust
	Nationality	...Indian
	Address	...All-India Kashiraj Trust, Fort Ramnagar, Varanasi.
5.	Editor's Name	...R.K. Sharma (New Delhi), Dr. R.N. Dandekar (Pune) V. Venkatachalam *(Chief Editor)* (Purāṇa Deptt., Fort Ramnagar Varanasi)
	Nationality	...Indian
6.	Name of the owner	...All-India Kashiraj Trust, Fort Ramnagar, Varanasi.

I, Yogendra Narain Thakur, hereby declare that the particulars given above are true to the best of my knowledge.

Yogendra Narain Thakur
Publisher.

Printed at the Ratna Printing Works, Kamachha, Varanasi.

Kashi Maharani Collection, Ramnagar Fort, Varanasi